कथनं । अथ षोडशस्य सर्गस्य जिनाभिषेकवर्णनविवरणं । जिनस्य वर्धमान इति नामकथनं । त्रिंशद्वर्षे वर्धमानस्य विरक्तस्य तस्य निष्क्रमणपुरःसरं द्वादशवर्षाणि यावत् तपस्यतो घातिक-र्मविनाशानन्तरं केवलज्ञानप्राप्तिकथनं । अथ चतुष्पादादिवशात् सौधर्मेन्द्रेण विरचितस्य समवसरणस्थानककीर्तनं । ततो रत्नसिंहासनोपविष्टस्य जिनेन्द्रस्य समन्तात् इन्द्रादीनां देवानां कौ-शिकादीनां पक्षिणां ऋषीणां द्विजवराणां संघपूर्वकमवस्थितिकथनं । अथ चन्दनाभि-धाना चेटकराजकुमार्यपि धौतैकाम्बरसंवीता भगवतः पुरःसरी बभूव । तदन्तरे, साधूनां, कल्पलोकस्थितदेवानां, नागकुमाराणां, किन्नरगन्धर्वादीनाञ्च तत्र समागमवर्णनं । अथ गौत-मनामा कश्चिद् भगवन्तं तीर्थार्थप्रकाशनाय अनुरुरोध । भगवानपि जिनधर्मार्थमुदाजहार । तदोद्देशेन यथा, संस्थानवाक्या, समवायवाक्या, आचाराङ्गतत्त्वार्थः, सूत्रकृतत्त्वार्थः, प्रज्ञप्ति-सूत्रं, ज्ञातृधर्मकथा, श्रावकाध्ययनार्थः, अन्तकृद्दशोत्तरः, अनुत्तरदशार्थः, प्रश्नव्याकरणं, विपाकसूत्रार्थः । दृष्टिवादार्थ इत्यादि । ततः सर्वेषां जिनोक्त संघपुरःसरं समवसरणगमन-कथनं । ग्रामेषु जिनस्य सर्वजीवविबोधादिकीर्तनं । धर्मतीर्थप्रवर्तनञ्च ।

एवं सर्गे,—काशी-काञ्ची-द्रविड़-महाराष्ट्र-आभीरादिषु सर्वेषु देशेषु जैनधर्मप्रचारकथनं । जिनमुखोद्भूतां मागधीभाषां कर्णपुटेन पिबतां लोकानां शान्तिवर्णनं । पद्मप्रभपुराधरनामधेये राजगृहे जिनस्य जिनस्य ऐश्वर्यादिवर्णनं । अथैकदा सुरनरतिर्यक्प्रभृतीनां धर्मशुश्रूषया परितो भगवन्तमुपविष्टानां पुरस्तात् जिनस्य धर्मव्याख्यानकीर्तनं । तत्र सिद्धासिद्धभेदेन जीवस्य द्विविधत्वकथनं । अ: ज्ञानावरणस्य पञ्चविधस्य क्षयेण, दर्शनावरणस्य नवभेदस्य भेदेन, अष्टा-विंशतिविधस्य मोहनीयस्य नाशात्, चतुर्विधस्य आयुषः क्षयोपक्षयेण, चत्वारिंशतो नामधेयस्य गोत्रद्वयस्य च नाशेन, पञ्चविधस्य अन्तरायकर्मणः विध्वंसेन च जीवस्य सिद्धत्वं भवति । अपि च सिद्धानां सम्यक्त्व-परमात्म-केवलज्ञान-केवलदर्शनादिकषायविमुक्तत्वादिकं । अथ मोहस्य उदय-नाशोपशमक्षयोपशमचिन्तयेव असिद्धोऽपि त्रिविध इतिनिरूपणं । असिद्धस्य मि-थ्यादृष्टि-सासादन-सम्यङ्मिथ्यादृष्टि-संयतासंयत-प्रमत्तसंयत-अप्रमत्तसंयत-उपशान्तकषाय-सू-क्ष्मदृष्टि-क्षीणकषायादिकगुणस्थाननिरूपणं । तत्र तत्र सुखदुःखप्राप्तिकारणकथनञ्च । पुनः भव्याभव्यभेदेन जीवानां द्वैविध्यकथनं । कुटिलमायालोभप्रभृतीनां फलकथनं । मधुमांसादिव-र्जनेन शुभायुःप्राप्तिरथवा कुकर्मभिः कुमानुषप्रापणमितिनिरूपणं । इन्द्रियविषयफलकथनं । कन्दर्पस्थितानां कन्दर्पनामकानां देवानां आभियोग्यकिल्बिषादिकथनं । सम्यग्दर्शनस्य दुर्ल-भत्वकथनपूर्वकं तदभाव एव संसारप्राप्तिनिमित्तकारणमितिनिरूपणं । पूर्वोक्तसम्यक्त्व-परमात्म-ज्ञानादीनां कारणादिकथनं । संक्षेपेण सनत्कुमार-माहेन्द्र-ब्रह्म-महाशुक्रादिकल्पविवरणकीर्तनं । तत्र दिव्यसुखानां भुक्त्यादिकथनं । केषाञ्चित् पूर्वभवाभ्यस्तसम्यक्त्वप्रकाराणां तीर्थकृतां जि-नत्वानुष्ठानेन निर्वाणप्राप्तिकथनञ्च । अथ जितशत्रुनामकस्य श्रेणिकराजस्य पुरतो गौतमस्य चरित्रविस्तारकीर्तनं ।

४—६ सर्गे,—अलोकाकाशस्वरूपनिर्णयवर्णनं यथा,—"स लोकस्तो यत्रास्ति जीवाजीवात्मकाः परे"। तत्र जीवपुद्गलयोरवस्थानाभावकथनं। एवं धर्माधर्मास्तिकायादीनां तत्र गतिस्थानाद्य-भावकथनञ्च। अथ अलोकाकाशमध्ये लोकस्य स्थितिकथनं। लोकसन्निवेशनञ्च। लोकस्य वेष्टक-घनोदधिघनवाततनुवातवर्णनं। तत्र चतुर्दशरज्जुविभागादिकथनं। लोकस्य सप्त-नरकादिपृथिवीपरिवेष्टितत्वनिरूपणं। वायूनां परिमाणादिकथनं। त्रिलोकमध्ये अधोलोकसंस्थानवर्णनं। तत्र नरकादिदुःखाख्यानञ्च। तिर्यग्लोकवर्णनप्रसङ्गेन द्वीपसमुद्रा-दिनिरूपणं तेषां संख्यापरिमाणादिकीर्तनञ्च। ऊर्ध्वलोकवर्णनं। तत्र सर्वार्थसिद्धेः सिद्धशिलायाः स्थानात् दूरत्वादिनिरूपणं। सिद्धानां जीवानां स्थित्यादिकथनञ्च।

७मे सर्गे,—वर्तनालक्षणः काल इति कालस्वरूपकथनं। मुख्यगौणभेदेन तस्य द्वैविध्यनिरूपणं। अथ समयादीनां वैविध्यात् तथाविधस्य कालस्य विविधत्वनिरूपणं। निश्चयव्यवहारकालयोर्लक्षणकथनं। परमाणुलक्षणकथनं तथाहि,—आदिमध्या-न्तहीनं निरवयवं अतीन्द्रियं मूर्तमपि अप्रदेशं परमाणुं जानीयादिति। सूक्ष्मकालस्य बहुभिरेतैर्व्यवहारात् तस्य बहुत्वकथनं तथा वर्ण-गन्ध-रस-स्पर्शैः पूर्णं गलनञ्च कुर्वन्तीति परमाणूनां पुद्गलाभिधानकथनञ्च। ततः संख्या-वृद्धि-रेणु-वालाग्र-यूका-यव-अङ्गुलादिमान-कथनं। एवं कल्पपल्यसागरोपमादीनां लक्षणादिकथनं। यत्र क्रमेण वस्तूनां प्रतिसमयमपचितिः सा अवसर्पिणी, तदन्यथा तु उत्सर्पिणीत्यनयोः लक्षणकथनपूर्वकं तत्र प्रत्येकं षट्कालसमय-निरूपणं। तत्र अवसर्पिण्यामनुक्रमेण षट्समयनिरूपणं, यथा,—सुषमा, सुषमा, सुषमा, दुःषमा, सुषमा, सुषमा, दुःषमा, दुःषमा, अतिदुःषमा चेति। एतद्विलोमेन च उत्सर्पिण्यामू-हनीयं। अथ प्रथमेषु त्रिषु सुषमसुषमादिषु कालेषु भारतभूमेः कल्पवृक्षपरिपूर्णत्वादिकथनञ्च। ततोऽतीते सुषमाख्ये कालद्वये अनुत्पत्तिक्रमेण दक्षिणभारते कुलकराणामुत्प-त्तिकथनं। तत्र प्रथमतः प्रतिश्रुतिनाम्नः कुलकरस्य राज्यशासनविवरणकथनं। ततस्तत्पुत्रस्य सन्मतिनामकस्य कुलकरस्य विवरणकथनं। एवं क्रमेण क्षेमङ्कर-क्षेमन्धर-सीमङ्कर-सीमन्धर-विमलवाहन-चक्षुष्मद्यशस्वि-अभिचन्द्र-मरुदेव-प्रसेनजिन्नाभिनाम्नां चतुर्दशकुलकराणामुत्पत्त्या-दिकथनं।

८ सर्गे,—ऋषभस्य जन्मादिकथनं। तत्र, पुरा किल दक्षिणभारते नाभिर्नाम नरपतिरा-सीत्। तस्य हि मरुदेवीति नाम्ना सुलक्षणा धर्मपत्नी बभूव। कदाचित्तद्गर्भे भगवान् ऋषभदेवो जनिष्यति तद्युक्ता देवराजेन अवतीर्णदिक्कन्यकाभिः सह स्वमतेन श्रीह्रीधृतिकीर्तिभिः सुरसुन्द-रीभिः सादरं सेव्यमाना मरुदेवी 'भगवान् जिनदेवो वृषरूपेण मदुदरे गर्भवेन प्रविशतीति' शुभस्वप्नदर्शनेन जिनगर्भानन्दिता प्राप्ते काले जिनदेवं प्रसूते। अथ सुरासुरनरकिन्नरगन्ध-र्वादयः सर्वे समागतं तीर्थकरजन्मोत्सवेष्वानन्दाय समागताः। ततो हि प्राचीन सुरासुरादि-कृतजन्माभिषेकं तत्र तत्र कारणान्तरं नाकपतिरिति समाख्यां प्राप। अथ सर्वैः देवैः सह पर-

सुरसुन्दरी देवमायया सूतिकागारं प्रविश्य शिशुमन्यं तत्र मुक्त्वा जिनं च ततो जिनदेवं सुमेरुशिखरदेशं निन्ये। सुरपतिरपि सार्द्धं सुरासुरनिकरैः तत्र भगवतो जन्माभिषेकं विधाय यथाविधि कर्णयोः रत्ने सम्पाद्य च रत्नकुण्डलाभ्यामलञ्चकार। अथ भगवन्तं वृषभेति नाम्ना-धर्म्माध्यक्षं हिरण्यगर्भ-प्रजापति-स्वयम्भू-प्रभृतिभगवन्नामनिर्वचनमुखेन तं तुष्टुवुः। तदनन्तरञ्च पौलोमी रोमाञ्चितशरीरा स्वाङ्कमारोप्य जिनदेवं पुनरेव यथास्थानमानीयार्प्य च सचरण शिशुप्रदानेन तत्पितरौ नितरामानन्दसमुद्रे निमज्जयाञ्चकार।

९ सर्ग.—अथ भगवान् स्वकीय कराङ्गुष्ठे निषक्तं पीयूषं पिबन् प्रतिदिनं बालचन्द्र इव उपचीयमानो समं समवयस्कैः बालक्रीडारसमनुबभूव। तदनन्तरञ्च वर्द्धमानयौवनकुसुमोऽसौ नन्दा-सुनन्दाभिधानस्य कन्यायुगलस्य पाणिपीडनमकरोत्। अथ नन्दा, नन्दनं भरतनामकं सुतामपि ब्राह्मीनामिकां युग्ममसूत। असूत च सुनन्दापि महाबलं सुतं सुतामपि सौन्दर्यसुन्दरीं। अथ नन्दायाम् अष्टनवतिसंख्याभिताः पुत्रा वृषभसेनादयः क्रमेणाजायन्त। ततो नाभेयस्य भगवतः प्रजानां दुरवस्थादर्शनेन जातकरुणस्य असिनाकेन, वाणिज्येन, शिल्पादिकर्म्मणेन च क्रमेण क्षत्रिय-वैश्य-शूद्ररूपत्रिविधवर्णविभागकरणकथनं। अथैकदा नृत्यन्तीं नीलाञ्जनाभिधा-नामिन्द्रनर्त्तकीं पश्यतो नाभेयस्य वैराग्योत्पत्त्यनन्तरं देवैः प्रबोधितस्य तस्य भरतादिपुत्राभि-षिक्तया सिद्धार्थवनगमनकथनं। ततः प्रणामचैत्यगमनपूर्व्वकं केशोत्पाटनकरणकथनं। अथ ध्यानस्थं जिनदेवं परितः स्थितानां क्षत्रियाणां क्षुत्पिपासार्दिततया भगवदभिप्रायमजानतामत एव मग्नानां देववाणीश्रवणेन कुश-चीरवल्कलधारणाकथनं। अथ षण्मासान् यावद्-अनाहारस्य मग्नस्य जिनदेवस्य पर्य्यटनकथनं। अनन्तरमेकदा राज्ञः श्रेयांसस्य गृहे तत्पारणाय जिनाय तेन राज्ञा इक्षुरसपूर्णः कलशो दत्त इत्यनेन दानतीर्थकरोत्पत्तिकथनं। अथ प्रतिग्रहः, उच्चस्थापनं, पादप्रक्षालनं' पूजनं, प्रणतिः, मनःशुद्धिः, वाक्शुद्धिः, काय-शुद्धिः, एषणाशुद्धिश्चेति दानविधेः नवविधत्वकथनं। अथ एकदा प्रलम्बजटाभारो जिनदेवः पूर्व्वतालपुराधिपतेः वृषभसेनस्य शकटास्याभिधानके महोद्याने न्यग्रोधवृक्षाधः ध्यानयोग-मास्थाय केवलज्ञानं लब्धवानिति कथनकथनं। तत्र इन्द्रादिभिरभिष्टुतस्य समागतानां भरतादीनां जिनस्य चारित्रैश्वर्य्यमवलोकयतां धर्म्मादिपदार्थविवरणकथनञ्च।

१० सर्ग—जिनस्य धर्म्मोपदेशनाकीर्त्तनं। तत्र दया, सत्यं, अस्तेयं, ब्रह्मचर्य्यं, अपरिग्रहता, पञ्चैतानि सूक्ष्मतया यतिधर्म्म इति स्थूलतया च गृहस्थधर्म्म इति निरूपणं। उक्तविधधर्म्मानु-ष्ठानेन च मोक्षो भवति। एतत्सर्व्वं धर्म्मस्य मूलं ज्ञानात् जायते ज्ञानस्य द्वादशाङ्गमिति-निरूपणं। तत्र अङ्गानि यथा,—पर्य्याय-अक्षर-पद-संघात-प्रतिपत्ति-अनुयोग-प्राभृतप्राभृत-प्राभृत-वस्तु-पूर्व्वाणि इत्यनेन श्रुतज्ञानविकल्पनिरूपणं। अथ सर्व्वपदार्थव्याख्यानभेदप्रदर्शनञ्च। अथ पर्य्यायार्थे,—इत्यादिप्रदर्शनं। तत्र क्रियावादिनादः तथापि,—नियति-स्वभाव-काल-दैव-पौरुषैः स्वतः पर-नित्यानित्यैः येन प्रत्येकं जीवाजीवादेः नवपदार्थस्य भेदाः विंशतिः। यथा,—

अस्ति स्वतो जीवो नित्यनित्यः, अस्ति परतो जीवो नित्यनित्यः, अस्ति नित्यो जीवो नित्यनित्यः, अस्ति अनित्यो जीवो नित्यनित्यः, अस्ति स्वतो जीवः स्वभावतः, अस्ति परतो जीवः स्वभावत इत्यादिना । एवमजीवाद्यष्टपदार्थेषु बोध्यं । अनेन प्रकारेण १८० भेदा भवन्ति । एवं स्वतः-परतोक्तैः नित्यत्वादिवर्जितैः शेषैर्जीवादीनि सप्तस्थानानि ७० स्थानपञ्चकानि भवन्ति । पुनः स्वतः-नियतिकालाभ्यां गुणितानि सप्तानि १४ चतुर्गुण । इत्यनेन ८४ भेदाः भवन्ति । अतो नास्त्युक्तैः पूर्व्वयुक्तैः ८४ भेदाः । यथा,—नास्ति स्वतो जीवो नित्यनित्यः, नास्ति परतो जीवो नित्यनित्य इत्यादीनि । एवं अजीवादिषु अष्टसु तत्त्वेष्वपि बोध्यं । इत्यनेन क्रियावाद-दर्शिमतदर्शनपूर्व्वकं विपरीतविधक्रियावादहृतिनिरूपणं । तथाहि,—आत्मास्ति जीवः, आत्मास्ति जीव इत्यादिप्रभृतिः पुण्यपाप नवपदार्थाः ६२ । अथ अज्ञानिकदर्शिवादस्य विपरीतभेदकथनं । तथाहि,—सज्जीवभावविन्, असज्जीवभावविन्, सदसज्जीवभावविन् । अवक्तव्यजीववित्, सद-वक्तव्यजीववित्, असदवक्तव्यजीववित्, सदसदवक्तव्यजीवविदिति । एवमजीवादिषु बोध्यं । विनयदर्शिवादस्य ३२ द्वात्रिंशद्भेदा भवन्ति यथा,—मनो-वचन-काय-दानरूपैश्चतुर्भिः प्रकारैः जनक-जननी-देव-नृपति-ज्ञाति-बाल-वृद्ध-तपस्विषु विनयः कार्य्यं इति । तथा परिकर्म्मं, सूत्रं, अनुयोगः, पूर्व्वगतं, चूलिका चेति परिकर्म्मादिभेदकथनपूर्व्वकं चन्द्र-सूर्य्य-जम्बूद्वीप-द्वीपसागर-व्याख्याप्रज्ञप्तिनिरूपणञ्च । एवमक्षर-पदादिनिरूपणं । तत्रैव मोक्षस्य आव-श्यकद्रोषाकथनञ्च ।

११—१२ सर्ग,—जिनपूजस्य भरतस्य दिग्विजयवर्णनं । तत्र मागधमागधदेव-दाक्षिणा-त्य-सिन्धुदेव-विताढ्य-हिमाद्रि-गङ्गादेवीविजयादिकथनं । तेषां नामादीनां भरतस्य उपो-पहारदानकथनं । अथ भरतस्य चक्रेण सहधान्यां अयोध्यायामागमनं प्रधानजनैरुपहार-दानं तेषां अभ्यादिपरकथनं । भरतस्य चक्रवर्त्तिपदाभिषेकश्च । भरतनिबद्ध शान्तिमयाधिपतेः कथाभिधानस्य यथार्थत्व पूर्व्वकस्वगोत्रस्य परिचयकथनं । तस्य तथायोग्य अवस्य जिनधा-मप्रवर्त्तनानन्तरं प्रत्यागमनकथनं । एवमेव-वहरण-कूप-प्रमुदन-देवयम-अवसर-समृद्ध-अन्यप्रभृतीनां चतुरशीतिसंख्यकानां सविस्तारां नामकथनं । तेषाञ्च देवतापरिमाणयो नव-धान जिनदेव इति कथनं । कदेशदा भविष्यद्वेदिनस्य भगवतो जिनस्य कैलासगिरिसमागमपू-र्व्वकं परिनामहोत्सं लोकसाधारणस्य विधाय सिद्धालयगमनकथनं । तत्र हि देवतादयः सर्व्वे समुपस्थायादिभिः भगवदेहं पूजयामासुरिति विवरणकथनञ्च । अथ भरतः चतुरशीतिल-क्षपूर्व्वं राज्यपदं पालयित्वा जैनदीक्षां अपालयदिति विवरणकथनं । तत आदित्ययशाः अपूर्व्व पञ्चः-पूर्त्ति राज्यपदाभिषिक्तं विधाय जैनधर्म्मानुष्ठानेन निर्व्वाणमवाप्तवानिति कथनं । एवं क्रमेण बल-सुबल-महाबल-बलिभद्र-अमृतबलप्रभृतीनामादित्यवंशीयानां पुनरेकरूपाख्यानाञ्च चतु-र्दशलक्षसंख्यकानां निर्व्वाणप्राप्तिकथनं । अथ वाक्षसमानकस्य जितशत्रुनृपस्य सोमयशा नाम पुत्र आसीत् । स च सोमवंशस्य प्रवर्त्तको बभूव इति कथनं । तत्र सोमवंशः पृथ्वी अपालयत्

ततः सुयशाः, ततो भुवनकः। इत्यमाद्याः पञ्चाशत्कोटिलक्षसंख्यकाः भरतवंशीया निर्वाणं ययु-रिति कथनम्। तथैवकुमारादीनां वीराणां निर्वाणप्राप्तिकथनम्। एवं नाभेयवंशीयशेषराजाद-रजयन्त-रत्नचन्द्रप्रभृतीनां निर्वाणप्राप्तिकीर्तनम्। अथ सगराभिधानस्य चक्रिणः षष्टिसहस्राणि पुत्राः समजायन्त। ते खलु दण्डेन क्षितिं खनन्तः कुपितेन नागराजेन भस्मीकृता इति जिनस्य सगरस्य जैनदीक्षया मोक्षप्राप्तिकथनम्। सगरस्य अपरः पुत्रः सम्भवनाथो नाम, तत्पुत्रः अभिन-न्दनः, ततः सुमतिनाथः, ततः पद्मप्रभः, ततः सुपार्श्वो नाम जिनेन्द्रः, ततः चन्द्रप्रभः, ततः पुष्प-दन्तः, ततः शीतल इत्यनेन इक्ष्वाकुवंशवर्णनं।

१४ सर्गे,—वत्सदेशे कौशाम्बी नाम नगरी आसीत्। तत्र सुमुखो नाम नरपतिर्बभूव। अथैकदा वसन्तसमयेऽसौ करिणमारुह्य कालिन्दीपुलिनोद्यानं प्रविवेश। तत्र हि वसन्तोत्सवे कामिनीमेकां सर्वाङ्गसुन्दरीं निरीक्ष्य अपरोधकस्थानेऽपि सोऽयं तया विना कृत्स्नेन शून्य इवाभूत्। अथ विदितवृत्तान्तेन मन्त्रिणा वनमालाभिधानया तया सह राज्ञः समागमः कारित इति विवरणकथनं। तयोः हरिरिति समाख्यातः पुत्रो बभूव यस्य च महागिरिर्नाम पुत्रोऽभूत्। ततो हिमगिरिः, ततः वसुः, इत्यादिना हरिवंशोत्पत्तिवर्णनम्।

१५—१७ सर्गे,—हरिवंशीयसुमित्रसमाख्यातस्य राज्ञो महिष्याः पद्मावत्याः शुभस्वप्नदर्श-नवृत्तान्तकीर्तनं। अथ तद्गर्भे (माघशुक्लद्वादश्यां श्रवणनक्षत्रे) जिनेन्द्रस्य जन्मकल्याणकथनं। अथ पुरन्दरप्रमुखैः इन्द्रादिकदम्बैः कृतोत्सवमालयेवं राजसूनं परीत्य जिनदेवं प्रणम्य च सुरसुन्दरीभिः तं कुमारमैरावत्यां समारोप्य गिरिराजाभिषेककायां सिंहासने कृताभिषेकं पुनरेव जननीसमीपमानीय च मुनिसुव्रतेति नाम्ना विख्यातश्चकार इति विवरणकथनं। अथ कुमारः सुरकुमारसन्निकरैः संसेव्यमानः सुकुमारके कैशोरे वयसि वर्तमानोऽसौ रमणीरत्नेन सम्प्राप्तो-ऽप्येकदा नभसि समुदितं जलधरमवलोक्य निरन्तरानन्दनन्दितोऽमधिमच्छ्रेव प्रचण्डतरमारुत-वेगेन विलीयमानं तमालोक्यैवमचिन्तयत्। अहो जलधरोऽसौ कालकवलितानां लोकानां शरीरादीनां विनश्वरतां प्रदर्शयन् उपदिशतीव मामेवं कथनमधिगताविति। अथैवं निर्विण्णमानोऽसौ सुव्रतनामकं तनयं राज्याभिषिक्तं विधाय जिनदीक्षया सम्यक् प्रव्रज्य जिनो बभूव। अथैकदा षष्टिदिनानि यावत् कृतोपवासोऽसौ भिक्षार्थे नगरीं जगाम। अथ राज-गृहनिवासी वृषभदत्तनामा वणिक् तस्मै भिक्षां ददौ। अचिरेण समये पुष्पवृष्ट्यादिकपञ्चक-आश्चर्यवर्णनं। मुनिसुव्रतस्य देशनाकथनम्। अथ सुव्रतस्तु दक्षनामानं तनयं राज्याभिषिक्तं विधाय निर्वाणं प्राप। अथ दक्षः स्वकन्यामिलायां ऐलेयाख्यं पुत्रं मनोहरीनाम्नीं तनयां च अजीजनत्। अथ कदाचिदेकदा दक्षः प्रजापतिः स्वपुत्रीं मनोहरीं वीक्ष्य विचित्रकुसुमशरैः आनुपपेदे। इत्यादि रोषकषायितेक्षणा तत्पत्न्येव ऐलेयेन सह दुर्गमदेशाभिमुखं प्रययाव। अथ ऐलेयेन नर्मदातीरे आसीन्नाम्नीं नगरीं निर्माय कुणिमनामानं पुत्रं राजपदे प्रतिष्ठाप्य तपस्यार्थं वनं विविशे। अथ कुणिमोऽपि वरदातीरे कुण्डिनाख्यं पुरं संस्थाप्य पुलोमनामके सुते.

राज्यभारं निधाय तपश्चरणार्थं वनवासी बभूव। अथ तस्यामेव श्रीसोम-चन्द्राभाख्यां देवानीति इन्द्रपुरसंज्ञापनकथनं। श्रीसोमप्रभेण सहोदरेण कुरुपुरसंज्ञापनकथनं। ततः क्रमेण सप्त-चन्द्रोदय-मास-सूर्य-देवदत्तानां वृत्तान्तकथनं। देवदत्तपुत्रस्य त्रिविक्रमनाथस्य विद्वद्धिपत्यकथनं। ततो निःशंसानामपुत्रादीनां चरित्रेण-सह अमितप्रभादीनां विवरणकथनं। अथ अमितप्रभस्य मधुनामा पुत्रो बभूव। तस्य तादृश-महावस्तुप्रभृतीनां वृत्तवन्धनां विवरणकथनं। क्षीरक-दम्बनामकस्य वेदविदुषः वसु-नारद-पर्वताभिधानाः त्रयः शिष्या अभवन्। तेषु पर्वतोऽक्षी-रकदम्बस्य पुत्र आसीत्। कदाचिद् वसुराजसभायां नारदपर्वतयोः अजार्थे संवादः, तत्र नारदेन कर्मकाण्डोद्देशेऽजशब्दस्य त्रिवर्षव्रीह्यर्थे समर्थिते पराजयं प्राप्ते च पर्वते वसुराजस्य पर्वतपक्षपातित्वेन तत्क्षणमेवाधःपतनद्वारा नरकगमनञ्च।

१८, १९ सर्गे,—अथ मथुराधिपस्य यदोर्वंश्यादिकथनं। ततः शूरस्य सुवीरस्य च उत्पत्तिकथनं। अथ शूरात् अन्धकवृष्ण्यादीनामुत्पत्तिकथनं। सुवीराच्च भोजकवृष्ण्यादीनामुत्पत्तिकथनं। अन्धकवृष्णेः समुद्रविजय-वसुदेवादिदशपुत्रकथनं। कुन्तीमद्रीति कन्याद्वयजन्मकथनञ्च। भोजकवृष्णेर् उग्रसेन-महासेनप्रभृतयः पुत्रा बभूवुरिति कथनं। अथ सुवर्णाभस्य जरासन्धस्य जन्मकथनं। तस्य चाराणस्यादीनां जयकथनादिकं। अथ सुप्रतिष्ठनामकेन मुनिवरेण राजगृहोपस्थितानां देवानां श्रावकाणां पुरतः सम्यक्त्वतत्त्वसंदर्शनाकथनं। तथाहि,—अहिंसा, सत्यभाषणं, अस्तेयं, ब्रह्मचर्यं निष्परिग्रहं चेति पञ्चधा महान्ति व्रतानि। कायिकादिभेदेन विविधगुप्तिकथनं। धर्मानित्यप्रत्याख्यानकर्मनिरतिकथनं। दंसनो दिनादिनिर्णिकथावृत्तकथनं। द्विविधधर्मप्रकारो निर्णिरूपणकथनं। अतिथिपूजादिकथनकथनं। मांस-मद्य-मधु-द्यूत-वेश्यादिव्यसनदोषनिरूपणकथनं। व्रतादीनां प्रवृत्तिसम्यक्त्वप्रधानानी-निषेधकथनञ्च। तथा ज्ञानभेदा जीवाः कर्मवशात् कुयोन्यादिषु आयान्ति इति कथनं। अथ पृथिवीजलाग्न्यादिषु जीवविभागसंज्ञादिनिरूपणं। एकेन्द्रियादिपञ्चेन्द्रियपर्यन्तजीवानां शरीरादिप्रमाणादिकथनं। अन्धकवृष्णेः पूर्वजन्मकथनं। वसुदेवादीनां पूर्वभवकथनं। ततः अन्धकवृष्णिः समुद्रविजयाय राज्याभिषेकं वसुदेवञ्च समर्प्य सुप्रतिष्ठस्य अन्तेवासी बभूव। तथा-भोजकवृष्णिरपि मथुरायामुग्रसेनमभिषिच्य विधाय निर्वाणगमनं अयारोपितविवरणकथनं। एके-कदा वसुदेवः समुद्रविजयस्य आदेशेन स्वकीयोद्याने भ्रमन् ततो नव निर्गमनाधिकारोऽ-नवायतां प्रमाणस्थानाम् कुञ्जिकां अकौतुकं जगाद। अथ 'कुमारस्वरूपदर्शनेनैव जनाः उन्मत्ता भवन्तीति' माधवेन कुब्जया अकथितोऽपि वसुदेवो नगरात् निर्गत्य श्मशाने अग्निमेकं विधाय कृत्वैकं विनाशाय तं निश्चित्य-लेखनाय 'यादवकुलनन्दनो राजा वैराग्यः सर्वं जीवनं त्यक्त्वा अग्निना प्रविष्टवानिति'। यथार्थो न ज्ञात्वा समुद्रविजयो गृहं गतो विजयपताकां पुरं प्रययौ। तत्र च स अन्यजितिविनयवतीकन्या सुग्री-वैविजयसेनयोः कन्याविवाहं अभियत्य कन्ययोः सोमा-विजयसेनाभिधानयोः पाणिग्रहणं कृत्वा

विजयसेनाख्यानकन्यानां पूर्वं समधिगता च ततो कस्यांचित् महाटव्यां प्रविवेश । तत्रासौ
विद्याधरकुमारेणाज्ञप्तचण्डवेगेन ततः कुञ्जरावर्त्ताभिधं विद्याधरनगरमनीयत । तत्र च स श्यामा-
भिधानां विद्याधरकुमारीमुपयम्य कदाचित् तया समाश्लिष्टोऽसौ अङ्गारकनामकेन केनचित्
विद्याधरयूना हृतोऽपि आकाशमार्गात् भूमौ निपतन्नेव कमलमुखाभ्यां यक्षकुमारीभ्यां चम्पा-
नगरीं निन्ये । तत्रैव चारुदत्ताभिधानेन केनचित् सञ्जातमैत्र्यादरोऽसौ गान्धर्वविद्यारहस्योद्घा-
टनेन गन्धर्वसेनानामधेयायाः राजकुमार्याः पाणिपीडनमकरोत् ।

२०, २१ सर्गौ,—उज्जयिनीनाथस्य श्रीधर्मराजस्य बलिः, बृहस्पतिः, नमुचिः, प्रह्लादश्चेति
चत्वारो मन्त्रिण आसन् । तथासौ राजा सार्द्धं सचिवचतुष्केन आचार्यसुव्रतादीन् जैनमुनीन्
द्रष्टुमना नगरबहिरुद्यानमाययौ । तत्र च तेषां संसर्गेण निर्वेदमापन्नः पद्मनामकं स्वतनयं
राजपदप्रतिष्ठितं विधाय विष्णुकुमारनामकात् जैनमुनेर्दीक्षां जग्राह । तदनन्तरमेकदा राज-
सिंहासनस्थितस्य पद्मस्य चित्तानुवर्त्तनेन प्रसादमापन्नस्य च 'सप्ताहं यावत् त्वं राज्येश्वरो भवेति'
वलये वरदानप्रभृतिकमेकान्तस्थितस्य तस्य पुरतो बलिविप्रकृतैराचार्यसुव्रताचार्यादिभिः संप्रार्थितो
विष्णुकुमार आजगाम । आगत्य च स बलिविचेष्टितं तस्मै निवेदयन् तस्यैवादेशेन बलिं
सभाजयितुं हस्तिनापुरं प्रति प्रचचाल । तत्र च स वटोऽभ्यर्थनया मुनीनामवस्थानाय बलेः
सकाशात् पादत्रयमितां भूमिं लब्ध्वा 'पाप पश्य मे पादत्रयं' इति व्याहरन्नेव महाकायतया
ज्योतिश्चक्रमास्पृशन् पादेनैकेन मेरुं द्वितीयेन च मानुषोत्तरप्रदेशमाक्रम्य तृतीयस्याश्रयाला-
भात् प्रभावेनाश्चर्यं क्षुभित इव बभौ । अथ सुरासुरप्रभृतिभिः सादरं प्रसाद्यमानोऽसौ शनैरेव
महाकायं संहृत्य प्रकृतिमापेदे । अपि च तदनुज्ञया देवादयो बलिं बद्ध्वा विनिष्ठ्य च
दुरात्मानं तं देशान्निर्वासयामासुः । इति प्रसङ्गेन विष्णुकुमारचरित्रवर्णनपुरःसरं विस्तरेण
वासुदेवचरित्रकथनं । तत्र गणिकाकलिङ्गसेनादुहितुः वसन्तसेनाया विवरणादिकथनञ्च ।

२२—२४ सर्गौ,—अथैकदा फाल्गुनोत्सवे गन्धर्वसेनया सह वसुदेवस्य पार्श्वजिनेन्द्रप्रतिमा-
पूजनाय तन्मन्दिरप्रवेशकाले वरयन्तीं कामपि नीलोत्पलदलश्यामां कन्यां पश्यतो मनोविकार-
दर्शनेन ईर्ष्याकलुषितहृदया गन्धर्वसेना त्वरितं द्वारान्तरेण तं जिनेन्द्रसन्निधिं नीत्वा तेन सह
स्तोत्रावल्या भगवन्तं तुष्टाव । अथ गृहमागत्य पादपतनेन प्रियां प्रसादयतो वसुदेवस्य निकटे
काचित् वृद्धा चेटी, निशि आजगाम । सा च दत्ताशीर्वादा कृताञ्जलिपरिघटा सती तमेवमाह
राजन् शृणुत चैवमाख्यानं यत् पुरा किल ऋषभेश्वरो जिनतनये भरते विन्यस्तराज्यभारः
प्रव्रज्यां जग्राह । तदा खलु उपशोभाख्याः बहवो राजपुत्राः तपसि निरता आसन् ।
तेषु नमि विनमि नामानावुभौ भ्रातरौ जिनभगवतः पादयोः निरताववभूतां तेन च चत्वार्ये प्रसा-
दमभ्युपगच्छन् जिनभक्तोऽसौ दित्यदित्यभिधानाभ्यां तयोः पत्नीभ्यां विद्याकोषं प्रददौ । तत्र मनु-
मानव-कौशिक-गौरिक-गान्धार-भूमितुण्ड-आदित्य-खेचर-मातङ्गप्रभृतयो विद्याधरा इतिक-
थनं । किञ्च, गौरी-प्रज्ञप्ती-रोहिणी-वज्रादिनी महागौरी-महाश्वेता-मायूरी-कालमुखीप्रभृतीनां

विद्यानां साधनवर्णनं। तथा,—इत्थं पञ्च-मानसादिभेदेन षडे। विद्याधरा कथिताः, तत्र विद्यानां नाम। तेषां वासवपदेन इति कथनं। तथापि गौरीकां गौरिक,कौशिकानां कौशिक इत्यादिना वसुभूतः तत्र विजयनिकुञ्जनिवासस्य मानसादिभिधानस्य विद्याधरपतेः जेष्ठपत्नी चित्रवती नाम। पार्श्वस्थितेन्द्रदेवस्य पूर्वावसरे या कन्यापुत्रता चन्द्रोदितिमपूर्वा श्रीलवसा नाम गर्भिणी, सा हि सदकुलादिनिशेति तस्यां शीतिर्न्मे विनटाभवि। चर्थेयं भवद्यंशादारभ्य प्रश्नेव पृष्टेन परित्र-क्षपायाज्या तततमेव पुरतः स्वरूपं साधेव पञ्चमी सदनभाविशुद्धि नीता। सद्गुणा इन्द्रमदा-नेन भवतीव हस्तार्धोकर्णवशात्ततो अत इन्दुका चिरत्नवती सतो विवाहात। चर्वेतदा विमानां वेतालवक्वा चपलादित्योऽसौ वसुदेवो विद्याधरपुराधिष्ठितं श्रीमत्तं नाम शिखरं प्राप्य तत्र श्रीलवनमः पाणिग्रहणं विधाय च वैरक्षतक्षुभात् तस्य अज्ञादिविवरणं शुश्राव। तत्र श्रीलक्ष्यलपत्रादिना विलक्षणांश विद्याधरेण श्रीलसयाः पदपरवहणान्वितोऽर्थं। इतिवेदन वसुदेवस्य इन्द्रधनवचनं। तत्र सोमश्रीनिवासिनया कयाचित् कन्यया सह वसुदेवस्य विवाहवचनप्रसङ्गेन मसरपुरेऽविसहलमानुशिवमःकामनविवरणवचन, तत्र विवाहेन मतानां शुभाशुभजयवनिवचन। एव वसुदेवस्य तिलकवसुपुरसमनभूय्य राजनवधानकारं पवनम-कन्यापाणिग्रहणवर्णनकथनं। ततश्च वेदमासपुरसमनपुरवरं कांचनपुरिनामकं राजानं विपात्य ततकन्यायाः कपिलायाः पाणिग्रहणवर्णनं। तस्याश्च तत्र कपिलाभिधानपुत्रस-मवकथनम्। एव वसुदेवस्य प्रान्तपुरापुरी-अचपुर-भद्रिलपुर-इलावर्धनपुरसमनपूर्व्यं तत्र-त्याभिः राजकुमारीभिः सह विवाहवर्णनम्।

२१—२८, सर्गे,—अथ इलावर्धनपुरपुरन्दरे इचिमुखेन सह वसुदेवस्य संवादेन चौरहा-व्यवसतुलस्य कार्त्तवीर्यस्य कामधेनुनिमित्तं जमदग्निविघातनं, तथा परशुरामेण कार्त्तवीर्यवधा-ख्यायादिविवरणकथनं, तत्र परशुरामः (जमदग्नः) निःक्षत्रियां पृथिवीमकरोदित्यादिकथनम्। अयावसरे कार्त्तवीर्यस्याङ्गनामा तारा नामधेयी आसीत्। सा हि जमदग्न्यभयेन पलायिता कौशिकस्य मुनेराश्रमे सुभौमनामकं पुत्रमसूत। अथासौ सुभौमश्चापि जामदग्न्यस्य शिरश्छित्त्वा एकवि-ंशतिवारान् ब्राह्मणरहितां पृथिवीं चकारेति तत्कथनम्। अहरकेतना सह वसुदेवस्य विवाह-वर्णनं। तस्याः तत्र चतुःषष्टिनामकपुत्रोत्पत्तिकथनं। तत्र मदनवेगाकथादिविषयाः प्रस्तावाः वसुदेवपरवपुर्वाक्यानामलसनं, ततो गन्धर्वदत्तस्य तत्र परिणयाभासानन्तरं कन्यापुरसमनपू-र्व्वं वेगवत्यभिधानया विद्याधरकुमार्या सह विवाहवर्णनम्। अनन्तरं मदनवेगानन्तरं विद्यु-द्दंष्ट्रस्य इलातकथनं। विद्युद्दंष्ट्रस्य अनन्तसर्वज्ञ अवलोकनं। पुरा किल चारुदत्ते-श्रीपूर्वविवाहः बौद्धोपवितसूत्। तत्र हि प्रियङ्गुसुन्दरीतिनामाख्याता सुरूपा कुमारी बभूव। अथ वसुदेवस्तस्याः पाणिग्रहणेच्छया तत्पुरीमभ्येत्य साध्वीनामे वर्षाणि चचार। तत्र हि तस्य केनचित् विप्रेण सह संवादेन चारुदत्तस्य स्वपित्रा पितामहपुराणोक्तचरि-तस्य चरित्रस्यानुवर्णनस्य नानाविधकथादीनां विवरणकथनम्।

१८—२१, सर्गे,—अथैकदा कामदेवमन्दिराख्यस्य प्रसिद्धस्य जैनमन्दिरस्य माहात्म्यकथन-मुखेन कामदत्तनामकश्रेष्ठिना पितृप्रतिष्ठितजिनप्रतिमाप्रशंसाकथनं । अथ कामदत्तान्वयजातस्य कामदेवनामकश्रेष्ठिनः बन्धुश्रीगर्भसम्भूता बन्धुमती नाम कन्यका आसीत् । वसुदेवोऽपि प्रत्यहं कामदेवमन्दिरं प्रविश्य जिनेन्द्रप्रतिमां भक्तितो रतिपूर्वकमपूपुजत् । अथ सन्तुष्टेन कामदेवेन तस्मै बन्धुमती समर्पितेतिकथनं राज्ञ एणीपुत्रस्य पुत्री प्रियङ्गुसुन्दरी वसुदेवसौन्दर्यामृतं निपीय च निज-रागमुत्कर्षं नयन्ती वसुदेवाय प्रदत्तेतिविवरणकथनं। एणीपुत्रस्य जन्मादिवृत्तान्तकीर्तनञ्च । अश्वग्रीवस्य ... प्रभावत्या सार्धं वसुदेवस्य विवाहवर्णनं। अथ तस्य ... राजसु-ताया जरायाः पाणिग्रहणपूर्वकं तस्यां जरत्कुमारनामकपुत्रोत्पादनकथनं। अथ अरिष्टपुरस्थ-स्य रुधिरस्य नृपस्य रोहिण्याः स्वयंवरमण्डपं समुद्रविजयजरासन्धादयो बहवो राजानः समाजग्मुः । तत्र वसुदेवोऽपि आवर्जितवेषमागतो। अथ रोहिणी तस्मैव वसुदेवे वरमाल्यं प्रददौ । अथ सकलैः राजन्यैः सार्धं समुद्रविजयेन च सह तस्य युद्धे अपमानकथनं । ततो विजयो 'वसुदेवोऽयमिति' प्रत्यभिज्ञाय भ्रातृस्नेहात् समालिलिङ्गेतिविवरणकथनं । अथ रोहि-ण्याः शरच्चन्द्रनिभः पुत्र एकः समजायत, स च सुतरामभिरामतया राम इति समाख्यामाप । अथ वसुदेवस्य परिणीताभिः सर्वाभिः सार्धं शौरीपुरप्रत्यागमनमहोत्सववर्णनञ्च ।

२२—२४,सर्गे,—अथैकदा धनुर्वेदविशारदैः शिष्यैः कंसादिभिः सह वसुदेवो जरासन्ध-निदेशाद्राजगृहं जगाम । तत्र च यो हि सिंहपुरवासिनं सिंहरथं जीवन्तं गृहीत्वा मां दर्शयिष्यति तस्मै देशेन सार्धं सुतां मे दास्यामीति, घोषणां श्रुत्वा वसुदेवः कंसेन वीर-पताकामपाहरत् । कंसोऽपि युद्धसमये सिंहरथं बद्ध्वा जरासन्धस्य पुरतमुपढौकयत् । अथ कंसस्य जन्मकथनं । तत्र कौशाम्बीवासिन्या मद्यकारिण्या कयाचित् यमुनाप्रवाहे मञ्जूषास्थोऽयं प्राप्तः सुतनिर्विशेषेण प्रतिपालितश्चेतिकथनं । अथ जरासन्धः मञ्जूषां नानानाद्य मञ्जूषोद्धृतलिपिपाठेन पद्मावत्युग्रसेनयोः पुत्रोऽयमिति सम्भाव्य तस्मै कन्यां जीवद्यशसं प्रददौ । अथ कंसोऽपि मथुरामभ्येत्य पितरमुग्रसेनं कारागारे निक्षिप्य च राज्यप्रतिष्ठितो-ऽसौ वसुदेवमानीय स्वसारं देवकीं गुरुदक्षिणामेव तस्मै प्रायच्छत् । अथैकदा जरासन्धकुमारी जीवद्यशाः कंसभार्या प्राह यथा 'अतिमुक्तकमुनेः श्रुतवान् पुत्रं देवक्या गर्भे यो हि भविता स बन्धु-पत्युः पितुश्च वै मृत्युरिति । अथ जिज्ञासितम् कंसेन वसुदेवं प्रसाद्य प्रसूतिसमये यावत् देवकी मद्गृहेऽवतिष्ठते वरः प्रार्थितः सोऽपि अविज्ञायाशयमिति तस्मै वरं ददौ । अथ देवकीवसुदेवाभ्यां कंसचेष्टितं अतिमुक्तमुनेरागमनपूर्वकं ज्ञात्वा निवेदनं । तत्र उग्रसेनकंसादीनां जन्मादि विवरणकथनं । देवकीतनयावसथः । तत्र देवक्याः सप्तमे गर्भे महाप्रभावशालिनो जन्मकथनं विधाय कंसादीन् विहत्य च विवेदा विष्णुरिति ओजस्वीतिकथनं । देवक्याः षण्णां सप्तानां पुत्राणां रामस्य च पूर्वजन्मकीर्तनं । तत्र वसुदेव-देवकी-बलभद्र-अनीकयशो-समुद्रविजय समागमनदेवकीपुत्रानानयनकथनं । अथ जिनेन्द्रस्य अरिष्टनेमेरवतरणकथन

सप्तोपजातिविधिकथनं । अथ सर्वतोभद्रजातिविधिविधिकथनं । अत्र हि लघवः ७४ + गुरवश्च २१एवं द्विशापि मिलित्वा १००अक्षराणि भवन्तीति ज्ञेयं । अथ महासर्वतोभद्रजाती- विधिकथनं । अत्र हि लघवः १९१, गुरवश्च ४९ । एवं द्विशापि मिलित्वा २४० अक्षरा- णि चत्वारिंशदुत्तरद्विशताक्षराणीति । अथ चित्रोपजातिविधिकथनं । अत्र लघवः १०, गुर- वश्च ११, एवं द्विशापि मिलित्वा २१ एकविंशत्यक्षराणीति । एवं क्रमेण भद्रजालजातिवि- धिकथनं । चन्द्रकान्तजातिविधिकथनं । कुन्दकान्तजातिविधिकथनं । एकावलीजातिविधिः । द्विधा- वलीजातिविधिः । मुक्तावलीजातिविधिकथनं । रत्नावलीजातिविधिः । कनकावलीजातिविधिः । मिश्र- मिश्रीकृतजातिविधानं । मेघपंक्तिविधिः । विमानपंक्तिविधिः । (आ) चामरपुष्पविधिकथनं । मत्त- गजजातिविधिः । यथा,—पद्म-कमल-कुमुद-कुन्दादि-शतदलादिनानाजातिपुष्पाणां विधान- कथनं । अथ एकवार-द्विवार-चतुर्विंशतिवारादिभिर्जातानां नवानां भावनादिविधिकथनं । अथ मालाग्रन्थनस्य परिमाणादिविधिकथनं । मालाग्रन्थनस्य बहुविधमालाविधिः । अथ चतुर्दशानां पुष्पमालाविधिकथनं । एवं कुमारसम्भव-सुकुमार-मन्दार-पञ्चयोजनानां विधि- कथनं । यथा,—सितचन्द्रिके मेघवर्णे निःश्वासवस्त्रका यदा दृष्टविचित्रविरचितस्तबके स्त- म्बशाखेन च तोरणरचनेन प्रकृतिमण्डलीतिकथनं । ग्रामादिषु ग्रामादिवद्धेषु च कपाटविनिवे- श्य अथ च यादृशो विमलमण्डल यः । यथा श्रीकमलरचनायाम् वनचरा कान्तसौधवर्णिनः, वर्णितचारुविधानः । यथा जल-धारा-मरकत-मानस-शारदेन्दुःकलाधरान्त मन्दारान मौक्- तिक-कमल वृक्ष कथनं । दशतम प्रकारेण प्रासाद-तोरण-सभा-गृह-मण्डप-वेदिका-मन्दिर-वाटिका- मालिकादिक-कांस्यकं-सौवर्णादि-पञ्चवर्णमयादिकथनमपि ।

२४—२०.मं.—अथ देवता प्रसादनानि देवानां नव नवपदार्थ प्रकारानुपूर्वकं नववस्त्र- पञ्चोपचारनक्षत्र मण्डलादिकथनं । कंसवर्ण नवग्रहाणां सप्तपदि विचारमते मार्कण्डेयादिविधि- कथनं । एवं शारदीय देवताः पञ्चपद्मानां देवीं च रचनं, कंसवर्ण तु पञ्चवर्ण विचारनीयं सप्तपदा- नामक्रमेण विवरणकथनं । अथ देवताः सुवर्णदर्भमयूरेण अलंकारकथनं । मालाग्रन्थनादयो मत्स्यमण्डलादिवितरणं पर्यायवत्सरात् देवकीपुत्रेण साम्प्रदायकथनं । अथ चन्द्रदेवः कविता पुष्पाणां जलमध्ये विधाय दोलादिना सकलवर्णादिको मण्डलेन प्रदर्शितमार्गोऽपि । मत्स्य- प्रासादेन चौरस्यानां वसुधानुगतीयं अन्यानवनसुधर्म च मसृणादयस्पृष्टवर्णं नवपुत्रमें चौलाय- प्रसादय संदर्शनेन शमदाताभ्यामेति लक्ष्मीनां । अथ शंकर देवताः प्रासादायां प्रतिमा 'मदान्धकवधकः परिवर्तितं भवे'दिति अष्टमे वर्णो मत्स्यस्य मातृसदनकोपविभ्रमं प्रातःस्नानात्मीयं । अथ शम्भोः पुत्रनागपृष्ठाखुरथ-मयूराश्व-सिंहवृषभादि- रथानकथनं । चन्द्रदेवः देवता मत्स्यारूढसमन्वितं चौरस्य मेघवाहनकथनं । अथ कर्दम- कन्यानां कर्पूरागरुकुङ्कुमं केशि-शत-यावकवृद्धिविधानसम्प्रदायकथनं । अथ शंकरमालाकारं पञ्चदेवानां दारुदारुकथनं । रत्नादिमनःपत्र कुबेरेः कन्यानां देवीसुवर्णानां अथ

राजकन्ययोर्विवाहवर्णनं । अथ जरासन्धस्य दुहितृपरिदेवितेन चतुर्थं कंसवधवृत्तस्य राजकन्या-
निधनार्थं कालयवनाभिधानसुतस्य प्रेषणं तथा यदुकुलात् कालयवनस्य पतने राजकन्याभ्यां तत्र
निधनश्रवणाख्यानम् । अथ जरासन्धप्रेरितस्य तद्भ्रातुरपराजितस्य नाशः । पराक्रमकीर्तनं ।

३८–४०, सर्गे,—अथानन्तरं कुबेरपत्न्याः शिवाया सुस्वप्नदर्शनादिवर्णनं । तद्गर्भे
चरितमेनिमानसस्य जिनेन्द्रस्य जन्मवर्णनाख्यानं । पूर्ववत् पुरन्दरादिदेवेन्द्रागमनेन जिनस्य
पुरन्दरसुन्दर्या शिवासमयपूर्वकं देवाः सुमेरुं प्रति गमनवर्णनं । अथ तेषां सुमेरुशिखरस्थी-
तस्य शिरोदेशेऽभिषेकमहोत्सवादिकरणविवरणकथनं । अथ तदेव सर्वेन्द्रकृतजिनेन्द्रस्तोत्रकथना-
दिकम् । अथ जरासन्धः यादवानां वार्तां श्रुत्वा क्रोधेन ज्वलित्वा यदुकुलनिधनाय तान् प्रति अनु-
गन्तुकामः सपुत्रमुद्दिश्य ययौ । इत्याकर्णितमात्रेण तथाऽपि तदा इतिविशेषेण यादवाः
सर्वे साकं प्रियजनैः सकलां दिशमुद्दिश्य प्रस्थानमारेभिरे । अथ जरासन्धोऽपि तेषामनुयायी बभूव ।
यदैकदा यादवाः सर्वे विन्ध्यगिरिमुपात्यक्तवन्तः तदा जरासन्धस्यानुवर्तनं निकटं च
पुनस्तथा तं प्रतीक्षन्त । तदा खलु दैवविशेषेण सरतोऽदेवताविशिष्टैः दिक्पालश्रितैव यज्ञविता
निर्मिताः । अथान्तरे समुपस्थितोऽसौ जरासन्धः ज्वालामालाविदग्धमानमिव यादवकुलं पश्यन्
तथागतां वृद्धामेकामपश्यत् । 'भद्रे विपुलः कस्मायं कष्मावारो दृश्यत इति । सा च यादवनिधि-
नेऽभूयात्, देव भूपतां, राजाधिराजस्य प्रथितप्रतापस्य जरासन्धस्य भयादेव सकलयादवानां
ज्वाले प्रवेशाभिलाषामपि यादवानां तदा सर्वेषां निधनं विज्ञाय सकलानां तेषां अग्निप्रवेशं
चितारोहितं पुरतो दृश्यत इति । अथ निजस्य अरातीनामनेनं विशिष्टोऽसौ सह सुहृज्जनैः
प्रतिनिवृत्य च राजगृहमाजगाम । अथ यादवोऽपि उपकण्ठमुद्धन्तः जलनिधेस्तटे यथा सुख-
मवतस्थिरे ।

४१—४४, सर्गे,—द्वारकानिर्माणं । श्रीकृष्णस्य राज्यवर्णनं कन्यापरिणयकथनं । नेमिकुमार-
संवर्धनविवरणं । नारदस्य द्वारवत्यामागमनकथनपूर्वकं तत्र सभाविवरणकीर्तनं । अथ दैवं
पुरनिवासिन उपरचितेः सुविधाभिषेकस्य नारदस्य पुत्रोऽयं देवानामनुमतेन यदवे सर्वे सदस्य-
जिनागमनमपीत्य पश्चिमस्य च चाकाशगामीर्णी विद्यां साधुनिषेवया संयमसंयमं बेले-इति
इत्याख्यानं । नारदोपदेशेन श्रीकृष्णस्य रुक्मिणीहरणविवरणकथनं । यदैकदा श्रीकृष्णेन
रुक्मिणीसुतनिष्ठूतं ताम्बूलं सुकाण्डेन संयोग रेपःकणाविताताः सत्यभामायाः सपत्नीन्दिरं-
मवेन तेन तद्गन्धपरिचिति' पृष्ट्वा यथपत्नी वेषं परिदधिता चापलावितमेव रुक्मिणीं देवता-
मिव रुक्मिणीं विलक्ष्य विनीयं च कुसुमाञ्जलिं पादयोरर्पिताः सर्वेषामप्ययुवेति इत्याख्या-
नं । अथ रुक्मिण्याः पुत्रजन्मानन्तरं धूमकेतुनामदेवासुरेणापहृततनयोऽस्याः कदिराख्याव-
नवनितश्चाः खादितोऽसौ मेघकूटनगराधिपस्य कालसम्बराख्यस्य राज्ञो महिष्या कनकमालया
सम्प्रिताः पुत्रनिर्विशेषेण प्रतिपालितश्चेति इत्याख्यानकीर्तनं । अथ नारदस्योपदेशेन पुत्रवार्ताधि-
गतया तदेव श्रीकृष्णः प्रेरयामास इति विवरणकथनं । ततो नारदस्य विदेहयात्रा-श्रीमन्दर-

शिशोर्मृतस्योज्जीवनपूर्वकं नामकरणात् मधुकैटभावेव प्रद्युम्नस्याभ्युदय [illegible] प्राप्ताविति विवरणं कृत्वा महादेवेनैव मेघकूटमनुप्रविश्य प्रद्युम्नस्यैवादिदृष्टान्तकथनं। मत्स्यभावमनुगतस्य भावेऽन्वेषणकथनं। अथ नारदस्योपदेशेन अनुपुराधिपस्य आत्मनः श्यामाक्षी आत्मपत्नी भार्या कृत्वा मद्भुवा [illegible] विष्णुरूपेण तत्र श्रीकृष्णस्य द्वारकायां प्रत्यागमनकथनं। तत्र क्रमेण निजवंशे-वरदुहितुः रुक्मवत्याः पाणिग्रहणविवरणकथनं। तत्र श्रीकृष्णस्य पौत्रानुगमनपूर्वकं ममुचि [illegible] नप्तुरनिरुद्धस्य उषायाः पाणिग्रहणकीर्त्तनं। एवं क्रमेण श्रीकृष्णस्य गौरी-पद्मावती-गान्धारी-प्रभृतीनां पाणिग्रहणानुकीर्त्तनं। बलदेवस्य रेवती-रुक्मवती-भीमा-राजीवनेत्राणां पाणिग्रहणकथनं।

४६—४९, पर्व,—युधिष्ठिरादीनां जन्मकथनपूर्वेण कृष्णां संभावनीकथनं। तत्र भागीरथ-जलकाम्यवीर्ययोः शाकिमपुराधिपयोः चन्द्रसोमप्रभयोः उत्पत्तिकथनं। तत्र सोमप्रभवीरस्य कुरोः कुरुवंशप्रवर्त्तनकथनं। ततः क्रमेण यदुवंशीयानां कृतवर्म-सात्यकि-उग्रसेन-उद्धव-अक्रूर-केशव-हरिवंश-सुर्यवंश-पृथुविजय-अयराज-सनत्कुमार-सुकुमार-नारायण-मरुत्प्रि-भावित-मनु-सुदर्शन-सुनाभ-भाव-पद्मनाभ-वासुकि-वसु-वासव-इन्द्रदीर्घ्य-[illegible]-विजय-पारम-रामानुज-धनञ्जयादीनां नामादिकथनं। तत्र धनपतेः धनञ्जयस्य धर्मात्मनाधिकाधिकारे-बलात्काराधिकः प्रियतमा जामदग्निकथनं। ततः धृतराष्ट्र-पाण्डु-विदुराणां जन्मकथनं। कुन्ती-सुतयुधिष्ठिरभीमादीनां जन्मादिकथनं। तत्र निर्वासितानां हस्तिनापुरनृपाणां पाण्डवानां वेशपरिवर्त्तनपूर्वकं कौशिकपुरी द्वैतवनवसुमत्यादिभ्रमणविवरणकथनं। तत्र युधिष्ठिरस्य समक्षमुपस्थितसम्राजः अभयदानं। तत्र भगवतस्य तस्य वनापुरगमनपूर्वकं प्रभा-सुप्रभा-पद्मादीनां राजकुमारीणां पाणिग्रहणकथनं। चित्रादिसंवादकथनं। ततः पाण्डवानां द्रुपदराज्यगमनपूर्वकं द्रौपदीस्वयंवरकीर्त्तनं। पुनः वनान्तिकानां पाण्डवानां वनवासादिदुःखकथनं। तत्र तेषां नानाविधिस्नानानन्तरं राजकन्याप्रतिग्रहणैश्वर्यादिदर्शनविवरणकथनं। ततो विराटनगरस्थितानां तेषां वेशपरिवर्त्तनादिदुःखकथनं। द्रौपदीकृष्णस्य कीचकस्य भावात् परिभावकाम्यानन्तरं तत्वज्ञानेन निर्वाणकथनं। द्रौपदीकीचकयोः पूर्वजन्मवृत्तान्तकीर्त्तनञ्च।

५०—६९। पर्व,—अद्भुतचरितकीर्त्तनं। तत्र विविधावतार-कुरुक्षेत्र-कुरुवंशादि-स्थानविवरणकथनं। नन्दनिधनकथनं। यदुकुलपतितायाः पृथ्वीपतेर्दुहितुः कलकलायाः दत्तककथनं। प्रद्युम्नस्य कनकलतापूर्वकं नारदोपदेशेन द्वारकागमने प्रद्युम्नः राजकन्यायाः कृष्णवर्णं। ततः नारदप्रमुखात् धर्मपरिचयस्य तत्र द्वारकापुरीप्रवेशनस्योत्सवादिवर्णनं। धर्मस्य जन्मादिविवरणकथनं। अक्रूरादीनां श्रीकृष्णपुत्राणां नामादिकथनं। तथा वसुकुलकुमाराणां पाणावेन प्रवेशं नामकथनं। तेषाञ्च नाटे पर्वोत्सवकथनं। [illegible] सन्निधाने नाना: पुत्रेषाः पूर्वजन्मादिविवरणकथनं। [illegible] तथा निर्वाणाश्रितीय

गत। अथ कृष्णमभिषेक्तुं यवनस्य जरासन्धस्य द्वारकागमनदूताभकथनं। यादवजरासन्धयोः युद्धे यादवानां तदुभयपक्षाभिमतानां प्रत्येकं नामादिकथनं। तत्र संग्रामवर्णनं। कृष्णेन-जरासन्धवधपर्यन्तम्। अथ जरासन्धस्य निधनानन्तरं श्रीदुर्योधनदुःशासनादीनां निर्वेदप्राप्तानां विदुरसमीपात् जैनदीक्षादिग्रहणकथनं। कर्णेन च युद्धसंरम्भे कर्णकुण्डलं विहाय दमवरसमीपात् जैनदीक्षां जग्राह, तत्स्थानं कर्णसुवर्णाख्यया सुविख्यातमिति कथनं।

५२—५४, सर्गे.—जरासन्धप्रभृतीनां यादवानामानन्दस्थानमानन्दपुरमित्याख्यं जैनमन्दि-रसुन्दरं स्थानमिति कथनं। अथ श्रीकृष्णस्य दक्षिणदेशादिविजयवर्णनं। तेन च स्वदेशाय यदु-वंशीयाय राजगृहपुरम्, उग्रसेनसुताय माथुरं, पाण्डवेभ्यः हास्तिनपुरं, [illegible] शौर्य-पुरञ्च दत्तमिति कथनं। अथैकदा नारदस्योपदेशेन धातकीखण्डभारतामरकङ्काभिधान-पुराधिपस्य पद्मनाभस्य द्रौपदीहरणाख्यकथनं। तदनन्तरं विदितहरणवृत्तानां पाण्डवानां सार्द्धं बलकेशवादिभिर्यदुवंशैर्देवस्य साहाय्येन लवणार्णवमुत्तीर्य तत्पुरं समुपस्थितानां तेषां द्रौपदीपुनरुद्धारविवरणकथनं। अथ भूय एव तेनोपायेन भारतमुत्तीर्णे तेषां समागतानां सकलभूपस्योपालम्भेन च्युतविषयाणां तेषां तत्र मथुराभिधानपुरीनिर्माणपूर्वकावस्थानादि-विवरणकथनं।

५५—५६, सर्गे.—बाणदुहित्रा उषया सह प्रद्युम्नतनयस्य अनिरुद्धस्य विवाहादिवर्णनं। श्रीकृष्णस्य बलभद्रादिभिः सह रैवतकविहारवर्णनं। नेमिजिनस्य वैराग्योत्पत्तिविवरण-कथनं। इन्द्रादिभिः सुरनिकरैस्तस्य अभिषेकानुष्ठानलक्षणकथनं। अथ बलकेशवादिभिर्निवार्यमाणोऽपि जिननेमिस्तपश्चरणार्थं गिरिराजं जगामेतिविवरणकथनं। तत्र जिनस्य ध्यानानु-ष्ठानकथनप्रसङ्गेन ध्यानस्वरूपकथनं। तत्र चित्तस्य समता उत्तमसंहननतया एकाग्रचिन्तायाः अन्तर्निरोधो ध्यानमिति निरूपणं। तत्र दुःखविघाताय अनुष्ठेयं। ध्यानमार्तं रौद्रञ्चेति द्विविधं। तत्र चाप्रशस्तमिति तद्द्विविधं। आद्यञ्च आक्रन्दनादिकं। आर्तन्तु चतुर्भेदं यथा, अमनोज्ञस्य विषयस्य अनुत्पत्तिचिन्तनं, उत्पन्नस्य च तस्य वियोगचेष्टा, तथा मनोज्ञवस्तुविप्रयोगस्यानुत्पत्ति-चिन्तनं, उत्पन्नस्य च तद्वियोगस्य अन्तचिन्ता चेति। तत्र अनुपादेयदुःखस्य साधकं चेतनादि-कमिति ज्ञेयं। तत्र बाह्यविषयकृतादिकम्। आध्यात्मिकं शङ्कादिप्रकोपनं। शारीरं कम्पस्वेदादि-निश्वसनं। मानसञ्च शोकदौर्मनस्यादिकमिति चतुर्विधं। एतस्यास्य अमनोज्ञस्य उत्पत्तिविशु-द्धिनिश्चिन्ताप्रबन्ध आर्तध्यानमिति ज्ञेयं। एतत्तु तत्त्वाविज्ञमिति समाख्यातं। संकल्पाध्यवसायरूपं द्वितीयन्तु उत्पन्नस्यामनोज्ञस्यास्य कथमभावः स्यादिति। अथ मनोज्ञस्य पुत्रकलत्रधनधान्यादेः सुखसाधनत्वं चाद्यमिति ज्ञेयं। आध्यात्मिकञ्च ततुचिन्तादिसाम्येन आरोग्यादिकं। मानसं वस्तु शोभनत्वादिरूपमिति। अथ ऐहिकामुष्मिकस्य मनोज्ञस्य वस्तुनो विप्रयोगो मा भूदिति संकल्पस्मृती-समाधानार्तं विज्ञातव्यं। अथ पूर्वोत्पन्नस्य मनोज्ञविप्रयोगस्य अभावे अधःस्थाने चतुर्थमार्तं ध्यानमिति। अथ रौद्रस्य ध्यानस्य हिंसा-संरक्षण-स्तेय-मृषानन्दभेदेन चातुर्विध्यकथनं। तत्र

चिंतादिषु वचनवचनविधिभिः चिंतनमन्वादय इति ज्ञेयं। अथ मुमुक्षुः परित्यज्य आर्त-रौद्रे द्वे ध्याने आवश्यकक्रियाभवेन योगमध्यस्थ धर्मध्यानं कुर्यादिति। धर्मस्य आज्ञापायविचया-नां साधकेन चतुर्भेदम् इति तथा धर्मादनपेतं ध्यानं धर्मध्यानमिति च ज्ञेयं। तच्च आज्ञापायविचयभेदेन द्विविधं। तत्र सूत्रार्थैकार्थसंकल्पनमूलादिष्वनुरागिता आज्ञा। आज्ञाविच-यमपि अपायविचयादिभेदेन दशविधं। तत्र संसारहेतूनां प्राणीनां कथं मोक्षं स्यादिति चिन्ता प्रवर्तमानस्य अपायविचयं नाम प्रथमं। शुभानां प्राणीनामात्मनामुद्धरणार्थं संकल्पकरणमुपाय-विचयं नाम द्वितीयं। जीवानामनादिनिधनमसंख्येयप्रदेश-उपयोगलक्षणादिचिन्तनं जीवविचयं नाम तृतीयं। तथा धर्माद्यजीवविषयकत्वेन तदनुस्मरणं पुंसः अजीवविचयं चेत्यजीवविचय-मिति क्रमेण अजीवविचय-विपाकविचय-विरागविचय-भवविचय-संस्थानविचय-आज्ञाविच-यानां लक्षणं। अथ शुक्लध्यानं शुक्ल, परमशुक्लभेदेन द्विविधं। तत्र प्रथमं तावत् पृथ-क्त्ववितर्कादिषु चिन्तनस्य पृथक्त्वेन वीचारोऽस्ति तथाच। वीचारश्च अर्थव्यञ्जनयोगानां क्रमेण संक्रमः। तथार्थो ध्येयो व्यञ्जनं शब्दः योगश्च कायादिकर्म इति निरूपणं। तद्वेन ध्यानेन अविचिन्त्यमानयो मुनिः मोहस्योपशमं कुर्वन् ध्यानमेकत्वेनाधिगम्य ध्यायत् ध्यानं याति। द्वितीयन्तु अथ वीचाररहितं चार्थादिषु एकत्वेन चिन्तनेऽस्ति तथाच। तद्वेन परमशुक्ल-ध्यानेन योगी ज्ञानदर्शनावरणीयान्तरायादिघातिकर्मभिः मुक्तः सकलविषयज्ञानयुक्तः केवलं प्राप्नो-तीतिनिरूपणं। अथ योगनिरोधः सूक्ष्मक्रियाप्रतिपाति समुच्छिन्नक्रिया यावत् तयोः शुक्लध्याना-भ्यां घातिकर्मक्षयात् ज्ञात्वा च सम्यक्त्वं प्राप्तिः निरूपणमिति।

१० मं,—जिनानां कल्याणकभूमिवर्णनं तत्र भूमिनिरूपणं। अष्टम-नवम-दशमादि-निरूपणं। अथ तदनन्तरं विधानेन भविता एक एव जिनदेवस्य मतं उपदेशप्रदानविवरणं। तत्र भगवतो वाणी एका द्विविधरूपा बभूव। तथा हि,—एकार्थवाचकत्वात् तद्वाणी एकरूपा। एवं द्विपर्यायत्वात् द्विरूपा। रत्नत्रयात्मकत्वात् त्रिरूपा। चतुःकषायनाशनात् चतूरूपा। पञ्चा-स्तिकायप्रकटनात् पञ्चरूपा। षड्द्रव्यप्रकाशनात् षड्रूपा। सप्तभङ्गीप्रकटनात् सप्तरूपा कर्मा-ष्टकनाशनात् अष्टरूपा। नवपदार्थकथनात् नवरूपा चेति। अथ भगवतो भावाभावकथनं। निर्ग्रन्थभावलक्षणं। धर्मेऽनुलक्षणं। तथाहि: चिन्तादिकार्यप्रवर्तमाना: सर्वेऽपि धर्मे-ऽनुकम्पिताः तथापि चिन्तादिकं सर्वदा कार्यमाद्यमपि इति तदद्यमजीवीनं कार्यं सर्वं अभिहितमिति। धर्मादिलक्षणं। अधर्मादिलक्षणकथनं। आकाशस्य अपवर्गादीनामस्ति-कथनं। कालस्य वर्तनालक्षणादिकथनं। तथा कालस्य अविनाशीति पदार्थकथनं। अथ कालतः अविभागा संसारस्थाः, विग्रहा च तदादिषु निरूपणं। जिनसम्यग्दर्शनज्ञान-चारित्राणि तत्त्वेन निश्चयात्मकेन मोक्षहेतुत्वनिरूपणं। जीव-अजीव-आस्रव-बन्ध-संवर-निर्जर-मोक्षतत्त्वनामकथनं। अथ शुभाशुभ-पुण्यपापानां कर्मणां जन्मकथनं। अथ पृथि-व्यादिभूतानां संख्यानिरूपणं जीवः तथा विशेष दिशां तदस्मिन्नत् चैतन्यमयत्वे—

इति चेन्न शरीरस्य चैतन्यवत्त्वनिराकरणादिद्वारेण चार्वाकमतखण्डनं । नापि कश्चित् सर्वज्ञाता- तथा हि—अतिशयानि कश्चित् प्रत्यक्षज्ञानवत्तारतम्यविश्रान्तः स्यादिति अतिशयिज्ञानवाद-खण्डनं । तथाप्यात्मा सर्वज्ञोऽपि नापि अवद्यादिप्रतिभासकः, तथाऽसौ सकलैः गुणैः सह पशुग्राहिवत् न कार्यं प्रतिपद्येत । यथाऽसौ विभुरपि भवितुं नार्हति; तस्मात् तथाऽसौ ज्ञानस्यार्थे दूरनिकटादिव्यवधानाय [illegible]निर्दिष्टितमां । अत एव देहमात्रपरिमाणोऽयमात्मेति सूक्तं । किञ्च समस्तपदार्थेषु संक्षेपतो जीवाजीवाख्ये द्वे तत्त्वे स्तः । तत्र बोधात्मको जीवः, अबोधात्मकस्त्वजीवः । तत्र अजीवस्य आकाशधर्माधर्मपुद्गलकालास्तिकायभेदेन पञ्चविधत्वं । अस्तिकायश्च,—अस्तु तत्त्वेषु कालत्रयसम्बन्धितया अस्तिव्यपदेशः, शरीरवदनेकप्रदेशत्वेन कायव्यपदेश इति । अथ जीवा द्विविधाः संसारिणो मुक्ताश्च । संसारिणोऽपि द्विविधाः समनस्का अमनस्काश्च । तत्र शिक्षाक्रियालापग्रहणरूपा संज्ञा येषामस्ति ते संज्ञिनः समनस्काः, एतद्विहीना अमनस्काः । तत्र नयादिभिरुपायैः प्रतिपन्नोऽयं जीवः । अथ अनेकान्तानि द्रव्याणि निर्णेतुमभ्युपायो नय इत्युच्यते । स च हि द्रव्यार्थिकपर्यायार्थिकभेदेन द्विविधः । तयोश्च नैगम-संग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढाख्यया षड्विधत्वमित्युक्तं । अथ पूरयन्ति गलन्तीति पुद्गलास्ते च द्विविधाः अणवः स्कन्धाश्च । अथ कायवाङ्मनसां कर्म योग आस्रव इति कथ्यते, तथा हि—यथा, सलिलावगाहद्वारं नद्याः आस्रवणकारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकया कर्म आस्रवतीति स योग आस्रवः । स च सकषाय-अकषायभेदेन द्विधा । तत्र कषन्ति हिंसन्ति आत्मानं कुगतिप्रापणादिति कषायाः । अथ सकषायत्वात् जीवः कर्मणो योग्यपुद्गलानादत्ते—इत्यतः कर्मबन्धयोग्यानां बन्धं बध्नातीति ततः बन्ध इति निगद्यते । अथ पुनरपि शुभाशुभभेदादास्रवो द्विविधः, तत्र अहिंसादिः शुभकाययोगः सत्यभाषणादिः शुभवाग्योग इत्यादिकं । अथ आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रव इति चोच्यते । तत्र च साम्परायिकी-कायिकी-आध्यात्मिकी-प्रत्ययिकी-नैर्यापथिकीभेदेन पञ्चविधक्रियानुप्रवेशकथनं । अथ ताः क्रियाः अपि प्रत्येकं पञ्चविधा इति निश्चित्य पञ्चविंशतिप्रकारक्रियास्वरूपकीर्तनं । इति सामान्येन कर्मास्रवाणां संबद्धतमपूर्वकं प्रत्येकं विशेषकार्यनिरूपणं । अथ पूर्वोक्ताहिंसानृतस्तेय-ब्रह्मचर्यापरिग्रहरूपस्य व्रतानुष्ठानसंज्ञाकथनं । अथ संसारकारणनिरोधोपायं मुक्तिः । सा च द्विधा [illegible]भेदात् । गुप्त्याद्युपायसमित्यादिभिः मिथ्यादर्शनाविरतिप्रमादकषायाणां बन्धहेतूनां निरोधकारणं संवर इत्युच्यते । अथासौ सागार-अनागारभेदेन द्विविधः । तत्र अहिंसाद्यणुव्रतपञ्चकं गुणव्रतत्रयपूर्वकं सप्तकस्य शिक्षाव्रतनिरूपणं । अथ सम्यग्ज्ञानदर्शनचारित्राणां रत्नत्रयाणां प्राधान्यकथनं । तत्र जीवादीनां यथावस्थं तत्त्वयाथार्थ्यत्वेन अवगमं सम्यग्ज्ञानं । एतज्ज्ञानं पञ्चविधं मति-श्रुत-अवधि-मनःपर्याय-केवलभेदात् । संसरणकर्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक्चारित्रं । तच्च अहिंसादिभेदेन पञ्चधा । येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेण अर्हत्प्रतिपादिते अर्थे श्रद्धानं सम्यग्दर्शन-

निति । अथ कर्मादिनिमित्ततया प्रकृतिनिरूपणं । सा च अष्टविधा यथा,—ज्ञानावरण-दर्शनावरण-वेदनीय-मोहनीय-आयुः-नाम-गोत्र-अन्तरायभेदेन । एतेषां बन्धकारणपूर्वकतया तद्भेदादिनिरूपणं । अथ प्रतिभेदनिरूपणं । तिर्यग्दर्शनादिभेदनिरूपणं । अथ-स्थावरनामभेदेन पञ्चस्थावरजीवस्य द्वैविध्यं तत्र द्वीन्द्रियादयश्चतुर्विधाः सूक्ष्मबादरपर्याप्तकाः । इत्यादयश्च स्थावराः । एवं वामन-उद्योत-अनुकूल-शरीरसुभग-दुर्भग-सुस्वर-दुःस्वर शुभ-अशुभनामादिप्रकृतिकथनं । अथ पुण्यपापप्रकृतीनां शुभाशुभानुभवनिरूपणादिकं । अथ अर्जितस्य कर्मणोऽनुभवात् तपआदिभिर्निर्जरणं निर्जरा । सा द्विविधा विपाकजा, अविपाकजा च । तत्र यथाविपाकजा यथाकालं कर्मणां निर्जरणं प्रथमा । तद्भिन्ना तु द्वितीया । अथ आचरणलक्षणसंवरतीति संवरः । स च निरोधकपो भावद्रव्यभेदेन द्विविधः । संसारहेतूनां कर्मणां निरोधः भावसंवरः । तत्कर्मपुद्गलग्रहणाभावो द्रव्यसंवरः । अथ गुप्तिसमित्यादिभेदेन संवरस्य प्रतिपत्तिः । सा च पञ्चधा ईर्या-भाषा-एषणा-आदान-निक्षेपभेदेन । गुप्ति-समितिधर्मादीनां स्वरूपकथनादिनिरूपणं । अथ कर्मणां निर्जरातो बन्धहेतूनामभावात् कात्स्न्येन दुःखनिवृत्तिर्मोक्ष इति निरूपणं । स एवाद्य ज्ञानादिगुणलक्षणानां प्रापणेन यदन्ततया प्राप्यत इति । एतद्रूपः मोक्षः तेषु प्राप्तवान् तत्कालमेवाथ अनुपमसुखपूर्वकं निरतिशयसुखमनुभवतीति ।

१८–१९. सर्गौ,—अथ नेमिजिनस्य विहारनिर्वाणपूर्वकं सुराष्ट्र-मगध-लाट कुरु-पाञ्चाल-पाटल-मालव-अङ्ग-बङ्गादिदेशेषु परिभ्रमणपूर्वकं जैनधर्मप्रचारकथनं । तत्पूर्वभवानां देवकीसुतानां नेमिजिननिकटमागमनकथनं । नेमिजिनस्य भव्यजनाग्निप्रापणसमर्थनीनां पुण्यकानां पूर्वभवकथनाभिधानं । तथैव तत्र नेमिजिनस्य शमादेन अविरामप्रवचनवर्णनः सत्वादिकथनं । तथापि, ऋषभनाथ-अभिनन्दन-सुमति-पद्मप्रभ-सुपार्श्वनेमिप्रभृतीनां नाम । तथा मतिश्रुतावधिमनःपर्ययकेवलज्ञानादिकथनं पुनः अमराणामध्यवन्दनातिशयवर्णनं च । द्वितीयपदं । तथा प्रथमस्य ऋषभनाथजिनस्य निर्देशेषु, चैत्रकृष्णनवम्यामुत्तराषाढानक्षत्रे जन्म, तस्य पिता नाभिराजः, माता च मरुदेवी तथा तस्य चैत्यवृक्षः न्यग्रोधपादपः, निर्वाणस्थानं कैलासपर्वत इति । क्रमेण तेन अर्हता जिनेन्द्राणां निर्वाणवर्णनं । अथ जिनानां प्रत्येकं दीक्षाकालकेवलज्ञानादिविवरणादिकं । तत्र आद्यस्य जिनस्य (ऋषभस्य) सर्वेषां पारणा तदितरेषां द्वितीयदिवसे, तथा, ऋषभस्य दीक्षाकालः षष्ठोपवासानन्तरमिति सूत्रं । किंच ऋषभस्य पारणाकालिकद्रव्ये इक्षुरसः, अन्येषु गोक्षीरनिष्पन्नं परमान्नमिति । अथ तेषां देहमान-परमायुःप्रभृतिनिरूपणं । अपि जिनानां यथाक्रमं पूर्वधरादि-शिक्षक-अवधिज्ञानि-केवलि-वादि-विक्रियाधारक-विपुलमतिमनःपर्ययज्ञानिनां । तत्र पूर्वधराणां संख्या कथनं । एवमेव च गणधराः । एवमायिका-श्रावक-श्राविकाणां चतुर्विधसंघस्य संख्याकथनं । तथा चक्रवर्तिनां बलदेवानां नारायणानां प्रतिनारायणानां च निरूपणं । तत्र भरतादीनां निर्वाणकथने द्वादश चक्रवर्तिनां भविष्यतां निरूपणं अथ द्वैपायनमुनेः कोपात् द्वारवतीदहनवर्णनं ।

तत्र रामकृष्णाख्यानान्तरे पर्वतं वाद्यानां पुरविमान द्वारकया वार्त्तं मणिद्वारेण निर्माणप्र-
तिपादनं। पुरा जिन नेमिजिनेन्द्रः कृष्णादिभिरर्च्चितैव द्वारावत्या देवामृतपूनैः कोटिन वार्त्तं
द्वारकया वृष्णीं द्वारवं, तथा कृष्णस्य माया बलभद्रनुगा कृष्ण निजं भविष्यतीति।
तदेतत् पुरा जिनदां निर्मितस्य बलभद्रोः द्वारकापरित्यागपूर्वकं दक्षिणदेशगमनकथनं।
अथ वाद्यानां विनाशेन चत्वरं शोकमग्नयोः रामकृष्णयोः दक्षिणपुरामुद्दिश्य प्रयाणकथनं।
तत्र वनमध्ये जलपानार्थं गतस्य कृष्णस्य जराकुमारनिक्षिप्तशरेण पञ्चत्वप्राप्तिकथनं।
बलदेवविलापवर्णनं। जराकुमारपाण्डवानां पाण्डवानां बलदेवप्रतिबोधपूर्वकं तप-
श्चर्यादिदेवलोकगमनवर्णनं। बलदेवस्य तपश्चरणं। पाण्डवादीनां प्रव्रज्याग्रहणकथनं। तेषां निर्वाण-
प्राप्तिकथनञ्च। नेमिनिर्वाणवर्णनञ्च।

No. 2041. **त्रिलोकसारः वा तिलोयसारो, सटीकः।** Substance, country-made paper, 10½ × 4½ inches. Folia, 257. Lines, 9 on a page. Extent, 5,143 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Triloka-sára ALIAS **Tiloya-sáro**. A description of the three regions of the Universe. The work is in Mágadhí verse, and extends to one thousand and nine stanzas. Attached to it is a Sanskrit commentary by Mádhavachandra Traividya, who says he has followed the opinion of Nemichandra Siddhántadeva, but it is not clearly stated whether this Nemichandra was the author of the text, or an earlier commentator. CONTENTS. Various kinds of regions, such as Bhavaras, Vyantara, Jyotih, Vimána, Nara, Tiryyak and Jina. Eternity of regions. Nihilism refuted. Agency of God in their creation refuted. Action of nature. Eternity of matter. Theory of illusion refuted. Theory of impermanence refuted. Regions compared to the evanescence of musical sounds. Extent equal to 14 *rajjus*. Extent of a rajju. Various kinds of measures. Various kinds of reckoning in relation to number, extension, solidity, expansion &c. These measures applied to practical purposes in measuring areas of land and water. The seven oceans relating to the earth. Regions of the earth. Distribution of heat and cold. Countries, their subdivisons &c. Hills. The river Vaitarani in the way to hell. The dwellers of hell. The number of Jina quarters. Countries in the 14 regions of the universe, their inhabitants. Asuras dwelling there,—other spiritual beings. The army of Hara. Characteristics of Asuras. Trees. Placing of images near

the root of sacred trees. Regions of Indra and others. The census of their inhabitants.

Description of Vyántara lokas. The number of Jaina temples therein. Various kinds of Kings who dwell therein—such as Kinnara, Kimpurasha, Mahoraga &c. Trees fit for Chaityas; these are Asoka, Champaka, Nágakesara, Tumbura, Vata, Asvattha, Tulasí and Kadamba. Jambudvipa stands to the east of the Vyantara region.

Description of Jyotir loka. In this chapter are given accounts of the celestial luminaries, and casually of the 16 continents or great islands, Jambudvipa, Ghátaki-khanda-dvipa, &c. Sixteen other continents. Characters of the different oceans connected with the continents. Stars and planets, their distance from each other. Planets reckoned at 88, their names. The paths, motions, dimensions &c. of the sun and the moon. Night and day, their causes and those of their decrease and increase. Intercallary months. Equinoxes, and other details regarding the motions of the earth.

Description of Vimána loka, or the region of the Devas. Devas and Jaina worship there.

Sacred places in the Nara loka. This includes notices of a great number of sacred places on earth and their presiding divinities.

Characteristics of emperors and their belongings. Descriptions of various distinguished Jaina emperors of India.

Description of the salt ocean and its belongings, including various sacred places therein.

The Sanskrit contents given below will be found fuller and more detailed.

Beginning [illegible] ।
[illegible] ॥ १ ॥
[illegible] ।
[illegible] ॥ २ ॥
[illegible] ।
[illegible] ॥ ३ ॥

टीकायाः । [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।

यस्यादृष्टिसुधानां विश्रयणाद्भूतप्रभाविरिव यस्य ।
तत्त्वामतमपदमादृनष्टं बलकुमतितिमिरनिचयमदः ॥

श्रीमदप्रतिहताप्रतिमनिःप्रतिपक्षनिःकारणभगवन्नेमिचन्द्रसैद्धान्तदेवचतुरनुयोगचतुरुदधिपार-गः चामुण्डरायप्रतिबोधनव्याजेनाशेषविनेयजनप्रतिबोधनार्थं त्रिलोकसारनामानं ग्रन्थमारचयन् तदादौ निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलकुलमवलोक्य विशिष्टेष्टदेवतानमस्करोति । 'बलगोविंद' इति । अस्यार्थः कथ्यते । वन्दामि नमस्यामि नमस्करोमि । कं, विमलयरणेमि-चंदं विमलतरनेमिचन्द्रं । इत्यादि ।

End. इति णेमिचंदमुणिणा अप्पसुदेणभयणंदिवच्छेण ।
रइयो तिलोयसारो खमंतु तं बहुसुदाइरिया ॥ १००९ ॥

टीकायाः । गुरुणेमिचंदसम्मद-कदिवयगाहा तहिं तहिं रइदा ।
माधवचंदतिविज्जेणियमणुसरणिज्जमज्जेहिं ॥

स्वकीयगुरुनेमिचन्द्रसिद्धान्तचक्रिणां सम्मताः । अथ वा ग्रन्थकर्तृणां नेमिचन्द्रसिद्धान्तिदेवा-नामभिप्रायानुसारिण्यः कतिपयगाथाः । माधवचन्द्रत्रैविद्येनापि तत्र तत्र रचिताः । इदम-प्यार्याचार्यवर्यैरनुसरणीयं । सः ग्रन्थसमाप्त्युत्तरकालीयमङ्गलं कुर्वन्नभीष्टाशंसनं करोति ।

अरहन्तसिद्धआइरिय उवज्झाया साहुपंचपरमेठी ।
इयपंचणमोकारो भवे भवे मम सुहं दिंतु ॥

Colophon. इति श्रीनेमिचन्द्रसिद्धान्तिदेवानामभिप्रायानुसारिणा माधवचन्द्रत्रैविद्येन-रचिता त्रैलोक्यसारटीका इयं समाप्ता ।

विषयः । लोकस्य भवनव्यन्तर-ज्योतिः-विमान-नरतिर्यक्लोक-जिनभवनरूपपञ्चाधिका-रकथनं । लोकस्य अनादित्वादिकथनं । तत्र शून्यवादनिराकरणं । ईश्वरकर्तृत्वनिराकरणं । स्वभावनिर्वृत्तत्वकथनं । परमाणुकारणतानिराकरणं । मायावादनिराकरणं । अविकमतनिरासः लोकस्य (भुवनस्य) मुरजसन्निभत्वकथनं । तत्र चतुर्दशरज्जुमयत्वकथनं । असंख्येयाः प्रदेशाः भागो रज्जुरिति लक्षणकथनं । इन्द्राङ्गुलादीनां मानानां प्रतिपत्तिकथनं । मानप्रक्रियाकथनं । तत्र लौकिकलोकोत्तरभेदेन द्विविधमानकथनं । तत्र मानोन्मानावमानगणिमानप्रतिमान तत्प्र-तिमानभेदेन लौकिकमानस्य षड्विधत्वकथनं । द्रव्यक्षेत्रकालभावभेदेन लोकोत्तरमानस्य चतुर्वि-धत्वकथनं । तत्र द्रव्यादीनां क्रमेण जघन्योत्कृष्टत्वकथनं । संख्याप्रमाणोपमाप्रमाण-भेदेन द्रव्यस्य द्वैविध्यकथनं । संख्येयमसंख्येयमनन्तमिति संख्यापि त्रिविधा । तत्र असंख्येयमनन्तं च प्रत्येकं त्रि-विधं यदीदं पुनः त्रिप्रकारमिति । अथ संख्येयज्ञाननिमित्तं, अनवस्था, शलाका, प्रतिशलाका, महाशलाकेति चत्वारि कुण्डानि कल्पितव्यानि । तत्र चतुर्णां कुण्डानां व्यासादिपरिमाणकथनं क्षेत्रफलप्रमाणोपायकथनं । तत्र क्षेत्रसंख्यानादिकीर्तनम् । कुण्डानां व्यासवृत्तादिफलानयनादि-प्रकारकथनं । क्रमेणानेन सप्रभेदासंख्येयानन्तयोः स्वरूपकथनं । एषां विषयस्य निरूपणं । तत्र

घनधारानिरूपणं। घनधाराकथनं। विषमधाराकथनं। एतयोः स्थानानयनादिप्रकारकथनं। एवं परत्र ज्ञेयं। तथा कृतिधाराकथनं। अकृतिधाराकथनं। घनधाराकथनं। अघनमातृकाधाराकथनं। घनमातृकाधारा। द्विरूपवर्गधाराकथनं। क्रमेणानेन चतुर्दशविधधारानिरूपणं। संख्यातासंख्यातानन्तस्य इतमिति निक्षेपं। अधुना पूर्वोक्तस्य उपमाप्रमाणस्य अष्टविधत्वनिरूपणं। यथा,—पल्यं, सागरः, सूच्यङ्गुलं, प्रतराङ्गुलं घनाङ्गुलं, जगच्छ्रेणिः, जगत्प्रतरः, घनलोकश्चेति। तत्र व्यवहारोद्धाराद्धापल्यानीति पल्यत्रयेण क्रमेण संख्याद्वीपसमुद्राः कर्मस्थित्यादयश्च वर्णिताः। पल्यप्रमाणोपायकथनं। अथ क्षेत्रमानादिकथनं। एवं सागरोपमसूच्यङ्गुलोपमादीनां स्वरूपनिरूपणं। पूर्वोक्तचतुर्दशरज्जुपर्यन्तं लोकस्य आयामकथनं। रज्जुफलादिनिरूपणं। अधोलोके क्षेत्रफलानयनाय तस्य अष्टधाप्रभेदकथनं। यथा,—सामान्यं, ऊर्ध्वायतं, तिर्यगायतं, यवमुरजं यवमध्यं, मन्दरं, दूष्यं, गिरिकटकञ्च। क्रमेणैषां क्षेत्रफलादिनिरूपणं। लोकशिखरे वायुवातत्रयकथनं। वातक्षेत्रफलादिकथनं। इत्थं भार इव लोकमध्ये त्रसनाडीस्वरूपकथनं। त्रसनाड्यधःस्थभूमिभेदकथनं। तत्र नरकदले सप्तभूमयः, यथा,—रत्नशर्करा, बालुकाः, पङ्क, धूमः, तमः, महातमः, प्रभा चेति। तत्र पृथिव्यादीनां भेदादिनिरूपणं। शीतोष्णादिविभागकथनञ्च। द्विविभागकथनं। नरकादिसंख्यादिनिरूपणं। विस्तरेण नरकवर्णनं। वैतरणीनदीवर्णनं। नरकाग्निः पतितस्य जीवस्य उत्पत्तिनियमकथनं तत्र प्रथमं तिर्यग्योनौ उत्पत्तिकथनं। नरकं गच्छतां जीवानां पृथिवीं प्रति नियमकथनं। अथ पूर्वोक्तभवनेषु सप्तकोटिद्वासप्ततिलक्षसंख्यकानि जिनभवनानि सन्तीति कथनं। भवनवासिनां कुलभेदकथनं। तत्र असुरादिगणकथनं। भूतानन्दादिगणकथनं। हरिषेणादिगणकथनं। क्रमेणासुरादीनां चिह्नकथनं। यथा,—चूडामणि-फणि-गरुड़-गज-मकरवर्धमान-वज्र-सिंह-कलश-अश्वाश्च। अश्वत्थ-सप्तच्छद-शाल्मली-जम्बू-वेतस-कदम्ब-प्रियङ्गु-शिरीष-पलाश-राजद्रुमरूपचैत्यतरुकथनं। चैत्यतरूणां मूलदेशे प्रतिमास्थापनार्थं स्तम्भादिनिर्माणप्रकारकथनं। इन्द्रादीनां भवनसंख्यादिकथनं। अनीकभेदकथनं। तत्र सत्यानीकादिसंख्याकथनं। तत्र भवनेषु असुरादिदेवीनां संख्याकथनं। तथाहि,—महादेव्यः ५, परिवारदेव्यः ८,९९९९८, वल्लभिकाः, १६०००, अग्रमहिष्यः ५६०००, विकुर्वणादेव्यः प्रत्येक ४०००००। तथा अनीकावस्थादिसंख्यादिकथनञ्च।

एवं भवनलोकनिरूपणानन्तर व्यन्तरलोकप्रकरणं। तत्र,—किन्नरसंख्यादिकथनञ्च। व्यन्तराणां कुलभेदनिरूपणं। अथ किन्नर-किम्पुरुष-महोरग-गन्धर्व-यक्ष-राक्षस-भूत-पिशाचरूपाष्टविधव्यन्तरदेवकथनं। तेषां वर्णादिनिरूपणञ्च। चैत्यवृक्षभेदकथनं। यथा,—अशोक-चम्पक-नागकेसर-तुम्बुरु-वट-कण्टक-तुलसी-कदम्बवृक्षाश्च। अथ वृक्षमूलेषु जिनप्रतिमास्थापनार्थं स्तम्भादिनिर्माणविधिकथनं। किन्नरादीनां (द्विधा) गणिकानिरूपणं। तेषां आवासस्थाननिरूपणञ्च। व्यन्तरलोकस्य पूर्वस्यां दिशि जम्बूद्वीपतुल्यानि षट्पञ्चाशदादि सन्तीति कथनपूर्वकं तदुपरि महाप्रमाणरूपकथनं। तत्परिमाणवर्णनादिकं। महत्वादिवर्णनञ्च।

अथ ज्योतिर्लोकस्वरूपनिरूपणं। तत्र जिनगेहसंख्यादिकथनं। चन्द्र-आदित्य-ग्रह-नक्षत्र-प्रकीर्णकताराभेदात् पञ्चविधज्योतिष्कभेदकथनं। एतत्कथनमनुषङ्गेण षोडशद्वीपनिरूपणं यथा,—जम्बूद्वीपः, धातकीखण्डद्वीपः, पुष्करवरः, वारुणिवरः, क्षीरवरः, घृतवरः, क्षौद्रवरः, नन्दीश्वरवरः, अरुणवरः, अरुणाभासवरः, कुण्डलवरः, शङ्खवरः, रुचकवरः, भुजगवरः, कुशवरः, क्रौञ्चवरश्चेति।

अन्त्यषोडशद्वीपकथनं यथा,—मनःशिलाद्वीपः, हरितालद्वीपः, सिन्दूरवरः, श्यामवरः, अञ्जनकवरः, हिङ्गुलिकवरः, रूप्यवरः, सुवर्णवरः, वज्रवरः, वैडूर्यवरः, नागवरः, भूतवरः, यक्षवरः, देववरः, अहीन्द्रवरः, स्वयम्भूरमणश्चेति। तत्र लवणाम्बुधिः, कालोदकाम्बुधिश्चेतिकथनपूर्वकं पूर्वोक्तद्वीपनामभिः प्रत्येकं समुद्रनामकथनञ्च। जम्बूद्वीपादीनां प्रत्येकं विस्तारसंख्यादिकथनं। समुद्रेषु प्रत्येकं रसविशेषकथनं। तत्र लवणसमुद्रं, कालोदकसमुद्रं, स्वयम्भूरमणसमुद्रे च जलचराः सन्ति नान्यत्रेतिकथनं। मनुष्यक्षेत्रविभागस्य कर्मभोगभूमिविभागस्य च पर्यन्तपर्यन्तद्वयनिरूपणं। ताराणां स्थितिस्थानादिनिरूपणं। चन्द्रादीनां स्थितिस्थानादिनिरूपणं। ज्योतिर्विमानस्वरूपकथनं। ग्रहादीनां वाहादिनिरूपणं। तेषां किरणप्रमाणनिरूपणं। चन्द्रादीनां विमानवाहकानां रूपादिकथनं। केषांचिद्ग्रहचाराणां द्विभागकथनं। चन्द्रादिगमननिरूपणं। ग्रहाणामवस्थानक्रमकथनं। दिनायामनयनप्रकारकथनं। पूर्वोक्तक्षेत्रप्रमाणादिकथनं। चन्द्रमण्डलप्रक्रियाकथनं। ज्योतिर्बिम्बसंख्यानयनादिप्रकारकथनं। चन्द्रस्य परिवारकथनं। अष्टाशीतिग्रहाणां नामानि यथा,—काल-विकाल-लोहित-कनक-कनकसंस्थान-अन्तरद-दुन्दुभि-रक्तनिभ-रूपनिर्भासप्रभृतयः। सूर्याचन्द्रयोरन्तरस्थाने चारकथनं। तयोः वीथीनिरूपणादिकं। चन्द्रादीनां परिध्यानयनप्रक्रियाकथनं। दिनरात्रिहेतुकथनं। तयोः हासवृद्धिप्रकारकथनं। अयनानयनप्रकारकथनं। सूर्याचन्द्रयोः गमनप्रकारकथनं। अस्तोदयानयनप्रकारकथनं। छायानयनप्रक्रियाकथनं। समुद्रचारक्षेत्रनिरूपणञ्च। वेदिकाक्षेत्रफलादिकथनं। द्वीपचारकथनं। चन्द्रादिपथवासप्रमाणादिकथनं। सूर्यतापस्य क्षेत्रविभागप्रक्रियाकथनं। चन्द्रादित्यग्रहाणां परिधिभक्तकालानयनप्रकारकथनं। चन्द्रादित्ययोर्नक्षत्रभुक्तिकालानयनप्रकारकथनं। राहोः नक्षत्रभुक्तिनिरूपणं। मलमासप्रकारप्रतिपादनं। दक्षिणोत्तरायणप्रारम्भे नक्षत्रानयनप्रकारकथनं। विषुवे पर्वनक्षत्रादीनामानयनप्रकारकथनं। ताराणामाकारविशेषकथनं। कृत्तिकादीनां परिवारताराकथनं। तत्संख्या तु एकादशोत्तरशताधिकसहस्र (११११) मितिकथनञ्च।

अथ विमानलोकनिरूपणं। तत्र च त्रयोविंशतिसहितचतुरशीतिलक्षसप्तनवतिसहस्रसंख्यामितजिनभवनकथनं। द्वादशकल्पानां नामकथनं। तत्र नामानि यथा,—सौधर्म-ऐशान-सनत्कुमार-माहेन्द्रप्रभृतीनि। कल्पातीतविमानसंख्याकथनं। इन्द्रकसंख्याकथनं। अर्चिरर्चिमालिनी-वैर-वैरोचनाख्यानि चत्वारि विमानानि दिग्गतानि, सोमरूपाङ्कस्फटिकाख्यानि चत्वारि

चित्रिमानानि, इत्यादिना विमानानां नामविभागादिकथनं। विमानानां स्थाननिरूपणं। प्रत्येकमिन्द्रकसंख्याकथनञ्च। तत्र नामानि यथा,—ऋतु-विमल-चन्द्र-वल्गु-वीर-अरुण-नन्दन-नलिन-काञ्चन-रोहितप्रभृतीनि। इन्द्रकाणां विस्तारादिकथनं। विमानानां वर्णकथनं। अथ सौधर्मादिद्वादशकल्पेषु देवानां मौलिचिह्नानि यथा,—वराह-मृग-महिष-मत्स्य-कूर्म-दर्दुर-तुरग-कुञ्जरप्रभृतीनि। इन्द्रकश्रेणीनगरवर्णनादिकं। तत्र सेनामुख्यनिरूपणं। परिषत्संख्यानिरूपणं नगरप्राकारोत्सेधादिकथनं। तत्र सुरपुरात् बहिः पूर्वादिषु दिक्षु अशोकसप्तच्छद-चम्पकाम्रवनषण्डकथनञ्च तद्वनमध्यस्थचैत्यवृक्षस्वरूपादिकथनं। लोकपालानां नगरनिरूपणं। सौधर्मादिस्वर्गस्थितानां पद्मगन्धा-चन्द्रप्रभृतीनां गणिकानां नामादिकथनं। अथ देवीनां तत्परिवारदेवीनाञ्च संख्यादिनिरूपणं। देवीनां नामानि यथा,—शची-पद्मा-शिवा-श्यामा-कालिन्दी सुलसाप्रभृतीनि। तत्र शच्याद्यष्टमहादेवीनां विक्रियाशक्त्यादिदेवीसंख्यादिकथनं। इन्द्रस्य प्रासादादिस्वरूपकथनं विशेषेण सुधर्मासभावर्णनं। तत्र वरजिनभवने सुराणां तीर्थकरभूषणपूजादिकथनं। वैमानिकदेवानां जननमरणान्तरकथनं। अथ लौकान्तिकानामवस्थाननिरूपणमुखेन मनुष्येष्वागत्य एककृत्वा लौकान्तिकाः सुरा निर्वान्तीति निरूपणं। सामान्यतो देवानां शरीरोत्सेधोच्छ्वासाहारकालादिनिरूपणं। मिथ्यादृष्टिसम्यग्दृष्ट्योः फलकथनं। एकदण्डित्रिदण्डिप्रभृतीनां परिव्राजकानां गत्यादिनिरूपणं देवानामुत्पत्तिस्वरूपकथनादिकं। तेषां जिनपूजारूपमहत्त्वनिरूपणं। अथ अष्टमभूमिसिद्धक्षेत्रस्वरूपकथनञ्च।

अथ नरलोके द्विहीनचतुःशतजिनालयकथनं। तिर्यग्लोके च द्वापञ्चाशदधिकजिनभवनकीर्तनं। मन्दर-कुलपर्वत-मानुषोत्तरप्रभृतिस्थानेषु जिनालयस्थानकथनं। जम्बूद्वीपे थालाकार-मन्दरपर्वतस्वरूपादिकथनं। तत्र भरत-हरि-विदेह-रम्यक-हैरण्यवत-ऐरावताख्यवर्षकथनं। तथा हिमवान्, महाहिमवान्, निषधः, नीलः, रुक्मी, शिखरी चेति षट्कुलपर्वता इति निरूपणञ्च। पर्वतानां प्रत्येकं वर्णकथनं। हिमवदादिषु स्थितानां ह्रदानां नामानि यथा,—पद्मः, महापद्मः, तिगिञ्छः, केशरिः, महापुण्डरीकः, पुण्डरीकश्चेति। तत्र जातकमलानां विशेषरूपकथनं। तथाहि,—मध्यमोदितदिक्चक्रं वैदूर्यनालं, एकादशोत्सेधदलं, पृथ्वीसाररूपं कमलमिति। तस्य कमलस्य विशेषपरिमाणादिकथनं। तत्कमलकर्णिकामध्ये श्रीदेवतायाः रत्नमयप्रासादकथनं। तन्निवासिनीनां देवीनां नामानि यथा,—श्रीः, ह्रीः, धृतिः, कीर्त्तिः, बुद्धिः, लक्ष्मीश्चेति। अथ परिवारकमलस्थितश्रीदेवतापरिवारसंख्यादिकथनं। गङ्गाप्रभृतिजातनदीनां नामानि यथा,—गङ्गा, सिन्धुः, रोहिता, हारी, सीता, नारी नरकान्ता, सुवर्णकूला, रूप्यकूला, रक्ता, रक्तोदा चेति। तत्र गङ्गायाः गमनमार्ग-निरूपणादिकं गोमुखीतिनामकारणकथनं। एवं सिन्धु-रोहितादीनां नदीनां गमनमार्गनिरूपणमुखेन वर्णनाकथनं। भरतादिवर्षाणां विस्तारादिनिरूपणं। भद्रशालादिवनपरिमाणकथनं। भूतारण्यवनादिप्रकारकथनं। मेरुनिरूपणं। नन्दनादिषु त्रिषु स्थितानां भवनानां नामादिकथनं। तत्र शील-पम-

यक्ष-कुबेराणां भवनाधिपत्यकथनञ्च। श्रीमादीनामायुरादिनिरूपणं। नन्दन-मन्दर-निषध-हिमवत्-रजत-रुचक-सागर-वज्राख्यगिरिकूटानां नामधेयकथनं। नन्दनगिरिस्थवापीस्वरूपादिकथनं। तन्मध्यप्रासादस्वरूपकथनं। मेरुगिरिचतुर्दिक्स्थितानां शिलातलानां नाम-स्थानादिकीर्त्तनं। तत्र जिनस्य भद्रासनादिनिरूपणं। अथ उत्तरकुरुप्रदेशे नीलगिरेः समीपे सीतानद्याः पूर्व्वतटे मन्दराचलस्य ऐशान्यां दिशि शतयोजनव्यासा जम्बूवृक्षस्थली तिष्ठतीति निरूपणं। तत्र स्थल्यां चतुर्णवेदिका द्वादश तिष्ठन्तीति कथनं। परिवारवृक्षादिकथनं। विशेषेण जम्बूवृक्षवर्णनं। अथ सीतोदापरतीरे निषधगिरिसमीपे देवकुरुक्षेत्रे मनोहरस्थले शाल्मलिवृक्षस्तिष्ठतीति-तद्वर्णनं। भोगभूमिकर्म्मभूम्योर्विभागकथनं, यथा,—देवकुरूत्तरकुरुक्षेत्रे द्वे उत्तमभोगभूमी, हरिरम्यकक्षेत्रे द्वे मध्यमभोगभूमी, हैमवत-हैरण्यवतक्षेत्रे द्वे जघन्यभोगभूमी ख्याताविति शिष्टानि सर्व्वाणि कर्म्मभूमिक्षेत्राणीति निरूपणं। अथ यमकगिरिस्वरूपकथनं। मेरोः चतुर्दिक्षु स्थितानां ह्रदानां परिमाणादिकथनं। चित्रगिरिकूटपर्य्यन्तादिवर्णनं। चतुर्दिग्गजपर्व्वतवर्णनं। गजदन्तपर्व्वतानां नामादिकथनं। विदेहदेशविभागादिकथनं तत्र वक्षारपर्व्वतारण्यादिनिरूपणं। ग्राम-नगर-खेट-खर्व्वट-मडम्ब-पत्तन-द्रोण-सम्बाह-दुर्गादिसंख्याकथनं। तदन्तरावगाहस्थितद्वीपादिवर्णनञ्च। विदेहदेशे ऋतूनां यथाकालोदयेन निरीतिभावत्वकथनं।

अथ राजाधिराजादीनां लक्षणकथनं। तत्र सेनापतिगणकरति-वणिक्पति-अमात्य-पुरोहिताद्यष्टादशश्रेणीनामधिपो राजा, पञ्चशतराजस्वामी चाधिराजः, सहस्रराजस्वामी महाराज इत्यभिधीयते—इत्यादिनिरूपणं। तीर्थङ्करलक्षणं। वत्सा-सुवत्सा-रम्या-सुरम्या-पद्मा-सुपद्मा गन्धा-गन्धिलादिविदेहस्थदेशानां नामकथनं। तत्रस्थानां नद्यादीनां निर्गमस्थानादिनिरूपणं। अथ विदेहस्य प्रथमविजयार्द्धे पञ्चपञ्चाशन्नगराणि सन्तीति तेषां नामकथनं। ततो विजयार्द्धतटस्थषट्खण्डमध्यस्थितवृषभगिरिस्वरूपकथनं। तत्रत्यनगरादिवर्णनञ्च। अथ नाभिगिरीणामवस्थितस्थानादिनिरूपणं। हिमाद्र्यादीनां कूटगिरिसंख्यानामादिकथनं। अथ भरतैरावतप्रभृतिहरिरम्यकक्षेत्रपर्य्यन्तं सर्व्वासां नदीनां संख्या लक्षत्रयं द्विनवतिसहस्राणि द्वादश च (३९२०१२) ज्ञातव्यमितिनिरूपणं मेर्व्वादीनां व्यासानयनप्रकारकथनं कुलशैलादिक्षेत्राणां विष्कम्भायामानयनप्रकारकथनं।

अथ भरतेषु ऐरावतेषु च वर्षेषु अवसर्पिणी, उत्सर्पिणी चेति कालद्वयं वर्त्तते। नान्यत्र तत्रस्थजीवानां यथासंख्यं हानिवृद्धिभवत इति कथनं। तत्र कालद्वयस्य प्रत्येकं षड्भेदनिरूपणं। यथा,—सुषमसुषमः, सुषमः, सुषमदुःषमः, दुःषमः, दुःषमसुषमः, अतिदुःषमश्चेति। क्रमेण षट्कालानां स्थितिकालनिरूपणं। जीवानामायुःप्रमाणनिरूपणञ्च। एवं षट्सु कालेषु क्रमेण नराणामुत्सेध-वर्ण-आहार-क्रमादिनिरूपणं। अथ भोगभूमेः स्वरूपकथनं। तत्र जातानामुत्पत्त्यादिविधानकथनं। कर्म्मभूमिप्रवेशक्रमकथनं। तत्र जातानां कुलकराभिधानानां मनूनां नामानि यथा,—क्षेमङ्कर-क्षेमन्धर-सीमङ्कर-सीमन्धर-विमलवाहनप्रभृतीनि। मनूनामन्योन्यमन्तरकालनिरूपणं।

तत्र प्रथमं चक्रवर्त्तिनः, चक्रवर्त्तिनो भाण्डारेषु द्व्यन्ति नवरे एव भाण्डागारेष्वादिका नवनिधि-मानव-नैसर्पकादीनिरूपणं । एवं तेषां वर्णकथनं क्रमनिरूपणञ्च । अथ चौविहारां तोरणपदादौ द्वयाम्भो धर्म्मेव वादित्रश्रुता नियोजित इति कथनं । चतुर्थे काले (दुःषमे) चतुर्विंशतितीर्थङ्कराणामुत्पत्त्यादिकथनपूर्व्वकं पार्श्वजिनवर्द्धमानजिनयोरन्तरोत्पत्त्यादिवर्णनं ; जिनानामन्तरकालनिरूपणं । जिनवर्त्ता[illegible]निरूपणं यथा,—पुष्पदन्ताद्यष्ट आदिनाथा-वसानेषु सप्तसु अन्तरेषु धर्म्मोच्छित्तिर्भूतासभावात् धर्म्मो नासीदित्यादिकथनं । अथ द्वादश-चक्रिणां (जिनानां) नामानि यथा,—भरतः, सगरः, मघवान् सनत्कुमारः, शान्तिजिनः, कुन्थुजिनः, अरजिनः, सुभौमः, महापद्मः, हरिषेणः, जयः, ब्रह्मदत्तश्चेति । एषां स्थितिकाला-दिनिरूपणं । काल-महाकाल-माणवक-पिङ्गल-नैसर्प्य पद्म-शङ्ख पाण्डु-नामानवनिधिनिरूपणमपि-त्विनिरूपणादिकं । सेनापति-गृहपति-स्थपतिप्रभृतिचतुर्द्दशरत्नकथनं । विजय-अचल-सुधर्म्म-प्रभ-नाराद्य-बलादीनामर्द्धचक्रिणां नामादिकथनं । एषां स्थितिकालनिरूपणं । तत्र बलेषु नेमीश्वरजिनस्य समये उत्पन्न इति कथनं । अर्द्धचक्रिणां प्राप्तगतिकथनं । तत्र बलभद्राणां भूमिं प्राप्येतिकथनञ्च । भीम-महाभीम-रुद्र-महारुद्र-प्रभृतिनवनारदकथनं । नारदानां कलह-प्रियत्वादुद्देषगमनकालत्वादिकथनञ्च, भीमावलि-जितशत्रु-जिनशत्रुप्रभृतयो एकादशरुद्रनामकथन-पूर्व्वकं तेषां स्थितिकालादिनिरूपणं । पद्म-पद्मप्रभ-वासुपूज्यचन्द्रप्रभ-पुष्पदन्तादीनां तीर्थङ्क-राणां वर्णकथनं, वंशकीर्त्तनञ्च । विक्रमाङ्क-कल्किनोः कालनिरूपणं । एवं विंशतिकल्किनामनन्ति क्रमपरम्परकल्किनिरूपणमादिकं । तत्र धर्म्मादीनां विनाशकारणकथनं । प्रलयकाले सम्बर्त्त-कानिलादीनामागमनादिवर्णनञ्च ।

अथ लवणार्णववर्णनं । तन्मध्यस्थितविजयपूरवर्णनञ्च । लवणार्णवान्तर्गतानां पातालानां वर्णनं । तत्र पूर्व्वोक्ता दिक्षु स्थितानां वड़वामुख-कदम्बक-पाताल-यूपकेशराभिधानानां तेषां परिमाणादिकथनं एवमन्यत्र स्थितानां ज्ञेयं । धातकीखण्डस्थितयोः अञ्जनगिरयोः वर्णनं । पूर्व्वमादौ लवणसमुद्रे जलोत्सेधपरिमाणकथनं । द्वीपवर्णनादिकं । कालोदसमुद्रवर्णनादिकं । धातकीखण्डपुष्करद्वीपादिवर्णनं । मानुषोत्तरसमुद्रवर्णनं । दिक्कूटादिवर्णनं । तत्र पूर्व्वदिक्कूटे विजया, वैजयन्ती, जयन्ती, अपराजिता, नन्दानन्दवती, नन्दोत्तरा, नन्दिषेणेति दिक्कुमारी-कथनं । एवमन्यत्रापि दिक्षु ज्ञेयं । द्वीपसमुद्रादीनामधीश्वरनिरूपणं । एवं वारुण-क्षीर-घृत-क्षौद्र-नन्दीश्वर-अरुणादिद्वीपसमुद्रेषु ज्ञातव्यं । विशेषेण नन्दीश्वरद्वीपवर्णनं । तत्रत्यजिनालयादिवर्ण-नञ्च । अथ त्रिलोकस्थितानामकृत्रिमाणां चैत्यालयानां सामान्येन भावादिनिरूपणं । तत्र जिनप्रतिमास्वरूपादिवर्णनञ्च ।

No. 2042. **आप्तमीमांसितं, आप्तमीमांसालङ्कृतिनामव्याख्यासहितम् ।**
Substance, country-made paper, 8 × 4 inches. Folia, 219. Lines, 9, 12 on a page. Extent, 8,048 ślokas. Character, Nágara. Date, Sm. 1525. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Áptamímáñsita, together with a commentary entitled *Áptamímáñsá-lañkṛiti.* A treatise on Jain philosophy, explaining the different dogmas, refuting heterodox theories, and giving a philosophical exposition of Jain duties. By Samantabhadra Yati. The commentary is by Vidyánanda.

Beginning. वृत्तिपद्यस्य । श्रीवर्द्धमानमभिवन्द्य समन्तभद्रमुद्भूतबोधमहिमानमनिन्द्यवाचं ।
शास्त्रावताररचितस्तुतिगोचराप्त-मीमांसितं कृतिरलं क्रियते मयास्य ॥१॥
येषा श्रीवर्द्धमानस्य परमजिनेश्वरसमुदयस्य समन्तभद्रस्य तद्गुणवाचस्य संस्तवनमाप्तमीमांसितस्यालङ्कृत्ये तदाश्रयत्वात् तदन्यतमाश्रयत्वे तदघटनात् । इत्यादि ।

मूलपद्यस्य । देवागमनभोयानचामरादिविभूतयः ।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान् ॥
अध्यात्मं बहिरप्येष विग्रहादिमहोदयः ।
दिव्यः सत्यो दिवौकःस्वप्यस्ति रागादिमत्सु सः ॥ इत्यादि ।

End. मूलस्य । जयति जगति क्लेशावेशप्रपञ्चहिमांशुमान्
विहतविषमैकान्तध्वान्तप्रमाणनयांशुमान् ।
यतिपतिरजो यस्याधृष्यान्मताम्बुनिधेर्लवान्
स्वमतमतयस्तीर्थ्या नाना परे समुपासते ॥

वृत्तिपद्यस्य । येनाशेषकुनीतिवृत्तिसरितः प्रेक्षावतां शोषिता-
यद्वाचोऽप्यकलङ्कनीतिरुचिरास्तत्त्वार्थसार्थद्युतः ।
स श्रीस्वामिसमन्तभद्रयतिभृद्भूयाद्विभुर्भानुमान्
विद्यानन्दघनप्रदोऽनघधियां स्याद्वादमार्गाग्रणीः ॥

Colophon. इत्याप्तमीमांसालङ्कृतौ दशमः परिच्छेदः ।
श्रीमदकलङ्कशशधरकुलविद्यानन्दसम्भवा भूयात् ।
गुरुमीमांसालङ्कृतिरष्टसहस्री सतामृद्ध्यै ॥
श्रीमूलामलसंघनन्दनमणिः श्रीकुन्दकुन्दान्वये
श्रीदेवीमदनाद्यपूज्यकमिधा (?) श्रीदेवसंघाग्रणीः ।
शोधनापराधं नास्ति ।

संवत् १५२५ । वर्षे पौषसुदि ९ । शुक्रवासरे । शुभं भवतु लेखकपाठकयोः ।

पुस्तके यादृशं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
वृषभादीन् जिनान् वर्धमानान्तान् प्रणिपत्य वै ।
अष्टसहस्रीयां प्रशस्तिं विदधे क्रमात् ॥
डवहाल्ये पुरे श्रीमज्जिनमन्दिरसुन्दरे ।
शकेन्द्रःसावहीनाह्वे मर्वीं पाति सतेजसा ॥
श्रीविक्रमनृपसमाख्याते पञ्चदशशते ।
वर्षाणां पञ्चविंशत्या नवम्यां शुक्लपौषके ॥

विषयः । १ प्रथमपरिच्छेदे,—भगवतः सर्वज्ञत्वकथनं । तथाहि भगवान् महानिति भवति तीर्थंकरत्वात् विपक्षादिमदोदयत्वाच्च । यो महान् न भवति न तीर्थंकरो न भवति, यथा-ब्रह्मादिः, तस्मात् तीर्थंकरत्वाभी महान् भवतीति निरूपणं । अथ प्रमाणसंप्लवादिसम्पाद-कथनं । सुगतकपिलादीनामाप्तत्वखण्डनपुरःसरं तीर्थंकरस्य भगवत आप्तत्वव्यवस्थापनं ।

अथ न कश्चित् पुरुषः सर्वज्ञः स्तुत्यः श्रेयोऽर्थिनां, श्रुतेरेव श्रेयःसाधनोपदेशसिद्धेरिति मीमांसकमतोपन्यासपूर्वकं तत्खण्डनं । अथ स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ भावनैव वाक्यार्थ इति भाट्टाः । नियोग एव वाक्यार्थ इति प्राभाकराः । विधिरेव वाक्यार्थ इति वेदान्तिका इत्येषां स्वपक्षोपपादनपुरःसरं परस्परं विप्रतिपत्तिप्रदर्शनं । अथ बौद्धमतेन अन्यापोह एव शब्दार्थ इति निरूपणपूर्वकेन तन्मतेन सर्ववादखण्डनं । तथाहि वस्तुस्वभावाभिधायकत्वाभावेन नियोगनिराकरणेऽपि विधेर्वाक्यार्थत्वघटनात् न भावना वाक्यार्थः सिद्धो भट्टस्येति न मनसि निधेयं । विधेरपि प्रमाणप्रमेयतदुभयरूपाद्यष्टविधविकल्पसङ्कुलतया बाध्यमानत्वात् । तथाहि प्रमाणं विधिरिति-कल्पनायां प्रमेयं किमपरं स्यात्, तत् स्वरूपमेवेति चेत् सर्वथा निरंशस्य सन्मात्रदेहस्य विधेः प्रमाणप्रमेयरूपद्वयविरोधात् । कथमिदानीं उपनिषद्वाक्यं प्रतिभासमात्रादन्यत् कथं वा तत् परिकल्पिताद्वाक्यात् विज्ञाता परमार्थस्वभावतादिरूपः परब्रह्मणः प्रतिपत्तिः, तथात्वे परिकल्पितानुमानादेः पारमार्थिकपावकादिप्रतिपत्तिः प्रसज्येत । अतएव कथमिदानीमन्यापोहः शब्दार्थ इति प्रतिषिध्यते । वस्तुस्वरूपाभिधायित्वेऽपि शब्दस्य अन्यापोहानभिधायित्वे अन्यपरिहारेण क्वचित् प्रवृत्तिनियमसत्तापायादिभिरपि शब्दार्थो माभूदिति समुदितार्थः । अथ विधेः प्रवर्तक-त्वनिरूपणं । तथाहि विधिः प्रवर्तकविधिः प्रवर्तकस्वभावो वा स्यादप्रवर्तकस्वभावो वा । आद्यपक्षे वेदान्तिकानामिव बौद्धादीनामपि प्रवर्तकः स्यात् । ननु तेषां विपर्ययात् न प्रवर्तक इति चेत्, तत एव वेदान्तिकानामपि अप्रवर्तक इति वक्तुं शक्यते तदुभयोः समानाक्षेपसमाधानत्वात् । यदि पुनरप्रवर्तकस्वभाव एव विधिस्तदा कथं वाक्यार्थः स्यान्नियोगवत् । यथा,-विधिः वाक्यार्थो न अप्रवर्तकत्वात् नियोगवदित्यनया च दिशा विधेः पञ्चदशविकल्पनादिकमूहनीयं । तदनेन प्रकारेण

आक्षेपप्रदर्शनादिपूर्वकं भावनैव वाक्यार्थ इति निरूपणकथनं। तथापि न परोदितो विधिर्वाक्यार्थः सिध्यति, नियोगस्यैव वाक्यार्थत्वोपपत्तेः। अथ नियोग एव वाक्यार्थोऽस्त्वित्यपि न युक्तं सामर्थ्यविशेषस्य वाक्यार्थतया प्रतीत्यभावात् नियोगविध्यादिस्वरूपप्रतिपादके सर्वत्र वाक्ये भावनाया एव वाक्यार्थत्वप्रतीतेः सैव वाक्यार्थः। सा च द्विविधा शब्दभावना अर्थभावना च। एतत् स्वरूपादिविवेचनं। प्रवर्त्तकज्ञानविवेचनं। तत्र द्रव्यवादी सांख्यो भेदं संकल्पितं मन्यते, तथा पर्य्यायवादी बौद्धः अभेदं संकल्पितत्वेन मनुते। एवमुभयोरपार्थे वस्तुनः सर्वथापि अर्थक्रियाकारित्वं न घटते इति विवेचनं। तत्र च पुरुषाद्वैतस्य संवेदनाद्वैतस्य च निराकरणं। तथा सामान्यविशेषयोः वस्तुस्वरूपयोः सर्वथा भेद इति बौद्धमतनिराकरणं। अथ दृश्यानुपलम्भिरभावं साधयति। अदृश्यानुपलम्भिस्तु संशयं साधयतीतिमतनिराकरणं। विज्ञानवादखण्डनं। इत्यनेन प्रकारेण बौद्ध-भट्ट-प्रभाकर-सांख्य-वेदान्तिकमतनिराकरणपूर्वकं सुगतादयः परस्परविरुद्धक्षणिकनित्याद्येकान्तमताभिधायिनः सर्वे न सर्वदर्शिन इति तथा श्रुतयोऽपि परस्परविरुद्धकार्य्यस्वरूपाद्यर्थाभिधायिन्यः सर्वा न प्रमाणभूता इति निरूपणं। किञ्च, कस्या अपि श्रुतेः प्रामाण्यं नास्तीति निर्णयः। प्रामाण्यवादः तत्र चार्वाकमतखण्डनपुरःसरं अनुमानादिप्रामाण्यसंस्थापनं। तत्त्वोपप्लववादिमतनिरसनं। अतत्त्वोपप्लववादिमीमांसकविशेषमतनिरसनं। प्राचीननैयायिकमतदूषणं। प्रामाण्यं स्वतोग्राह्यमितिमतखण्डनं। बौद्धमतखण्डनं। सांख्यमताक्षेपकीर्त्तनं। वेदान्तिकमतदूषणं। अभ्यासदशायां स्वतःप्रामाण्यमनभ्यासदशायान्तु परत एव ज्ञप्तिः इत्यनेकेषां मतकथनं। अनेकान्तवादकथनं। अथ सुनिश्चितासम्भवद्बाधकप्रमाणत्वमिति स्याद्वादिनः स्वमतनिष्कर्षकीर्त्तनञ्च। तथा अनेकप्रमाणवादिनामपि कपिलकणभक्षाक्षपादपातञ्जलवेदान्तिकनैयायिकसौगतादीनामभिमतानामपि प्रमाणान्तरतया मताक्षेपपुरःसरमुक्तस्य प्रमाणान्तरत्वसंस्थापनं। अथ यदसत् तत्र सुनिश्चितासम्भवद्बाधकप्रमाणं। यथा मरीचिकायां सलिलं सम्भवद्बाधकप्रमाणं। यथा च मेरुमूर्द्धनि मोदकं सन्दिग्धासम्भवद्बाधकं। सुनिश्चितासम्भवद्बाधकप्रमाणत्व सर्वत्र इत्यनेन प्रकारेण प्रकृते सर्वज्ञे सिद्धसाधनतानिरूपणं। चेतनस्य आत्मनोऽज्ञानावरणादिकर्म्म एव मदिरादिवत् मोहोदयकारणमितिनिरूपणं। अथ दोषो हि तावदज्ञानं ज्ञानावरणस्योदये जीवस्य स्यादितिनिरूपणं। विज्ञानवादखण्डनं। पृथिव्यादौ चेतनादिगुणस्य स्वभावोऽनुपलब्धान्यथानुपपत्तेरिति पृथ्व्यादिभूतशरीरादात्मनः पृथक्त्वादिनिरूपणं। यथात्मनः प्रज्ञाकरादेः वार्हन्तिः अयः धर्मोऽत्यन्तविनाशानुपपत्तेः। सात्मात्मनोऽपि कर्म्मणां नित्यत्वे परिशुद्धिः पृथ्व्वाभावो हि यथो नानिरित्याभिप्रेता सा च वाहन्तिरेव सर्वेरिति सत्याप दतेऽपि न स्याने च वेति निरूपणं। अभावखण्डनं। आत्मनि अज्ञानरूपमलस्य आगन्तुकत्वनिरूपणं मतनिरसनं। तथा संसारकारणं मिथ्यादर्शनादिकं, तन्निवर्त्तकञ्च सम्यग्दर्शनादिकमिति निर्णयः। आत्मनः ज्ञानादिगुणस्वभावत्वकथनेन दोषस्वभावत्वाभिधेः दोषस्य कादाचित्कत्वादिकथनं। क्षणिकवादनिराकरणं। अथ अर्हद्भगवान् निर्दोषो युक्तिशास्त्राविरोधिवक्तृत्वात्, तथा

कल्पात् पृथिव्याकायिकविषयकी भवति तद्विलक्षणस्य प्रभावेण पृथ्व्यप्कायवनस्पत्यादि-
प्रकारेण तत्र निर्ग्रन्थस्यादिजीवानुगमेन चरमेण परमाणोरिति निरूपणं । नैरयिकप्रकार-
वर्णं । जीवस्वरूपनिरूपणं । तथा हि वनस्पतिकायनिगोदानां तत्स्वरूपनिरूपणं जीव इति
निरूपणं । पूर्वोक्तप्रकारेणादिविकल्पानुगमेन पार्श्वस्थलक्षणं । श्रावकपर्यायभेदनिरूपण-
प्रसङ्गेन जीवाजीवादिलक्षणं । पुद्गलस्य योनिसंस्थान संस्थानं । देवादेरागतोऽधिकारि-
लक्षणं । संसारस्य बन्धमोक्षादिपरिणामानुगमेन मिथ्यादर्शनाविरतिप्रमादकषाययोगानां
स्वरूपनिरूपणं । ज्ञानादीनामाराधनाप्रकारानुगमेन चारित्रलक्षणं । कायकायस्थितिनि-
रूपणप्रसङ्गेन अविनाभावस्वरूपनिरूपणं । वायुकायादिनिरूपणं । वायुकायोऽसर्व;भरतक्षेत्रानां
तुल्यादीनां चैतन्यस्वरूपनिरूपणं । तत्र योगादिलक्षणं । रूपवेदनादिस्वरूपस्थानादीनां जीव-
स्थानां लक्षणं । प्रत्यक्षप्रमाणविवेचनं । न्यायादिलक्षणं । सर्वजीवानामनुसारेण नियमस्था-
नादिस्वरूपनिरूपणं । पुण्यपापनिरूपणं । तत्र सूक्ष्मबादरादिलक्षणं । पर्याप्तत्वादिलक्षणं । नारे-
काणां स्वरूपलक्षणं । बहुमानत्वादिस्वरूपनिरूपणं । चरमत्वादिलक्षणं । प्राणातिपातादिस्वरूपनिरूप-
णं । तत्र जीवलक्षणादिलक्षणं । नैरयिकजीवप्रमाणस्वरूपलक्षणं । द्रव्यप्रमाणविवेचनं ।
तत्र जीवसंस्थानादिलक्षणं । द्रव्याणां अस्तित्वादिस्वरूपनिरूपणं । सर्वज्ञानैकत्वादिलक्षणं ।
एकत्वादिलक्षणं । द्रव्यादिचतुष्टयस्वरूपनिरूपणं । मायोपमाः सम्प्रेषणात् सर्वे भावा
इति जीवलक्षणं । निर्विकल्पदर्शनादौ कालस्वरूपादिलक्षणं । सम्यग्दर्शनादिस्वरूपादि-
विवेचनं । तत्र अविनाभावादिसम्बन्धस्वरूपलक्षणं । चरमत्वादिलक्षणं । नित्यानित्यत्वादिप्रति-
बोधकीर्तनं । प्रत्यक्षज्ञानस्वरूपविवेचनं । कार्यकारणस्वरूपनिरूपणादिकं । द्रव्यपर्याययोः
नानात्वनिरूपणादिकं । लक्षणस्वरूपकथनं । प्रमाणाभासलक्षणं । संवेदनस्य जीवपर्यायत्वनि-
रूपणं । जीवस्वरूपादिकथनं । परमाणुस्वरूपसंस्थापनं । द्रव्यगुणपर्याययोरेव भिन्नत्वोः
स्वलक्षणत्वनिरूपणं । एकत्वपृथक्त्वात् द्रव्यस्य द्वैविध्यनिरूपणादिकं । तत्र पुण्यपापबन्धहेतुनिरू-
पणं । मिथ्यादर्शनाविरतिप्रमादकषाययोगानां बन्धहेतुत्वनिरूपणं । संज्ञानादिनिरूपणञ्च ।
जीवस्य प्रत्ययनिरूपणं । ईश्वरस्य जगन्निमित्तकारणत्वादिप्रत्याख्यानं । पञ्चो परमेष्ठिनां
मेव शरीरादिकार्यत्वप्रतिनिरूपणं । केवलज्ञानप्राप्तानां सिद्धत्वनिरूपणं । सर्वत्र च ए-
कैकान्तवादखण्डनं । स्याद्वादस्य सम्यग्ज्ञानत्वादिस्थापनपूर्वकस्वरूपकथनञ्च ।

No. 2043. भगवतीवृत्तिः । Substance, country-made paper, 13½ × 5 inches. Folia, 217. Lines, 21 on a page. Extent, 18,144 ślokas. Character, Nágara. Date, Sm. 1399. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bhagavatí-vṛitti. A Sanskrit commentary on the Bhagavatí Sútra, a Jaina work in Mágadhí on *Viváha-prajnápti*—or unfailing knowledge—*i. e.*, knowledge leading to absolute emancipation. The codex comprises only the fifth or last book. Anonymous.

Beginning. सर्वज्ञमीश्वरमनन्तमसङ्गमग्र्यं सार्वीयमस्मरमनीशमनीहमिद्धं ।
सिद्धं शिवं शिवकरं करणव्यपेतं श्रीमज्जिनं जितरिपुं प्रयतः प्रणौमि ॥ १ ॥
नत्वा श्रीवर्द्धमानाय श्रीमते च सुधर्मणे ।
सर्वानुयोगवृद्धेभ्यो वाण्यै सर्वविदस्तथा ॥ २ ॥
एतट्टीकाचूर्णी जीवाभिगमादिवृत्तिलेशांश्च ।
संयोज्य पञ्चमाङ्गं विवृणोमि विशेषतः किञ्चित् ॥ ३ ॥

End. पुस्तकलेखककाला नमस्काराः प्रकटार्थाश्चेति न व्याख्याताः ॥

Colophon. इति भगवतीविशेषवृत्तिः समाप्ता ॥

विषयः । भगवतीसूत्रपञ्चमाङ्गस्य व्याख्यानं ।

No. 2044. काव्यकौमुदी । Substance, country-made yellow paper, 14½ × 3 inches. Folia, 52. Lines, 5 on a page. Extent, 765 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Kávya-kaumudí. A concise treatise on rhetoric. Anonymous.

Beginning. नमस्कृत्य गिरं बुद्धिचन्द्रचारचकोरीं ।
चेतोम्बुजमरालमूलकलाय नमते ॥

End. तथा च दण्डी ॥ ये चाप्यपि विकल्प्यन्ते तेषाम् कार्य्येण वक्ष्यतीति ।

Colophon. इति काव्यकौमुद्यां शब्दार्थालङ्कारनिरूपणं तृतीयः परिच्छेदः ॥
इति काव्यालङ्कार-गुणदोषप्रकाशिनी ।
चालोदयतु सर्वतःकुमुदं काव्यकौमुदी ॥

विषयः । अथ काव्यस्य गुण-दोषालङ्कृतीनां निरूपणं ॥

No. 2045. वैदिकलिङ्गार्थविवेचनम् । Substance, country-made paper, 12¾ × 5¼ inches. Folia, 4. Lines, 11 on a page. Extent, 150 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vaidika-liṅartha-vivechana. A disquisition on the use of the potential mood in the Vedas. The codex is incomplete, and the author's name cannot be made out.

Beginning. यत्प्रापाकेषु मार्गेण पुरुषार्थचतुष्टयं ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलं ॥ १ ॥
सत्यज्ञानमनन्तमानन्दमजमव्ययं ।
सकलकविसं वन्दे गुरुमानन्दकविसं ॥ २ ॥

इह खलु परमकारुणिकेन भगवता औमितिबन्धिना अथातो धर्मजिज्ञासेत्यादिना द्वादशलक्षणात्मिकायां धर्मो विचारितः । तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः । यथा यागादिः ।

End. भावार्थाधिकरणन्यायमताचाभिमतानां भवत्ये

Colophon. इतः परं खण्डितं ।

विषयः । दर्शितेत्यत्र प्रत्ययगतलिङ्त्वांशेन पुरुषप्रवृत्त्यनुकूलव्यापारकपायाः शाब्दीभावनायाः प्रतीयमानत्वमित्यादिविवेचनं ॥

No. 2046. शारीरकमीमांसाभाष्यविवरणं, वा प्रकटार्थः । Substance, country-made paper, 10¾ × 4 inches. Folia, 119. Lines, 15 on a page. Extent, 10,500 slokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

S'áríraka-mímáñsá-bháshya-vivarana alias **Prakaṭártha.** A gloss on S'aṅkara's commentary on the Vedánta-sútra. Anonymous.

Beginning. सत्यं ज्ञानमनन्तं यत् कूटस्थं सुखविग्रहं ।
नित्यमुक्तं परं ब्रह्म नमामि तदहं सदा ॥
ज्ञात्वापि यस्य तत्त्वाज्ञानविज्ञानेन
व्याख्यातृमतमतथा परिनायिर्थेताः ।
तस्योपनापपरत्नाय मयेह भाष्ये
प्रारभ्यते विवरणं प्रकटार्थमेतत् ॥

End. एवं ब्रह्मास्वयं नित्यमचरं परमं पदं ।
निद्रानि च च मध्यानि समद्यापूरितं सदा ॥

Colophon. इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे श्रीमचतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तश्चायं ग्रन्थ इति ॥

विषयः । मीमांसाभाष्यव्याख्यानं ॥

No. 2047. शिवार्कोदयः । Substance, country-made paper, 11 × 5 inches. Folia, 333. Lines, 11 on a page. Extent, 9,880 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

S'ivárkodaya. A metrical gloss on the metrical scholia of Bhaṭṭa Kumárila Svámí, on Sañkara's commentary on the Mímáṇsá Sútra of Jaimini. By Gágá Bhaṭṭa *alias* Viśveśvara Bhaṭṭa, son of Dinakara, grandson of Rámakṛishṇa, and great-grandson of Náráyaṇa Bhaṭṭasurí.

Beginning. आद्येऽध्याये धर्ममानं प्रमाणं मानाधीना मेयसिद्धिर्यतो हि ।
आद्ये पादे मानताचोदनानामुक्ता वाक्यार्थवादादिकानां ॥ १ ॥

Colophon. इति श्रीमन्नारायणभट्टसूरिसुतश्रीमद्रामकृष्णात्मजभट्टदिनकरसुतगागाभट्टकृतः शिवार्कोदयः समाप्तः ॥

विषयः । श्लोकैर्भट्टकुमारिलप्रणीतमीमांसाश्लोकवार्त्तिकाख्यग्रन्थस्य पद्यैर्निबन्धनं ॥
पञ्चकमिदं वर्णितं ।

No. 2048. मीमांसाकुसुमाञ्जलिः । Substance, country-made paper, 12 × 5 inches. Folia, 439. Lines, 8—9—10 on a page. Extent, 11,264 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mímáñsá-kusumáñjali. A scholia on the Mímáñsá Sútra of Jaimini. By Gágá Bhaṭṭa *alias* Viśveśvara Bhaṭṭa, son of Dinakara Bhaṭṭa. The codex is very defective.

Beginning. निर्विघ्नमस्तु । वन्दे वन्द्यकुमारमातिकमेोवारि वदस्य ।
कतराधापरिचरणो चरणो कथानिधेः कुलधेः ॥ १ ॥
सारं यत् श्रुतिसिरसां द्युम्नपं दकमेनयसां ।
सतु को भक्तवत्सलो शिवापापसमो वन्दे ॥ २ ॥
श्रमात्तं चेत्तसतको लक्ष्मीनारायणाभिध ।
प्रभाःदिवाकरसमौ पितरौ समुपाश्रये ॥ ३॥

श्रीमद्रामकृष्णानन्दविरचितोऽस्याटनः ।
श्रीरामचन्द्रस्य चाचेन द्विजः कलाचेतु ॥ ४ ॥
विवेचराचराख्य मानाचहसभीषिकः ।
क्षितिः करोतु क्षितिमां ददचे चाचकाद्दराम् ॥ ५ ॥

व्याख्यायाम् विषार्थमाहात्म्यसंपन्नमहदर्थानां तथाद्भिमतुपचे । पूर्वचाहे विविधविशेषचोर्थेद्धेन चाचार्येण विशेषकथैव च प्रसाके विदे चतुर्णोपक्षितेषु भाषान्तरेषु प्रसाके प्रतिपाद्यते ॥

Colophon. इति श्रीमद्वसिष्ठमहर्षिकृतरामायणतात्पर्यप्रकाशविवेचनमहविरचिते श्रीमद्रामकृष्णाख्यो द्वादशाधिकारः पादः ॥

विषयः । श्रीमद्रामायणव्याख्यानं । पुस्तकमिदं प्रथमे मध्ये चरमे च खण्डितं ॥

No. 2049. महारामायणं वा वाशिष्ठरामायणं, वाशिष्ठतात्पर्यप्रकाश-नामटीकासहितं, उत्तरार्द्धं । Substance, country-made paper, 15¼ × 9 inches. Folia, 1,509. Lines, 16 on a page. Extent, 75,000 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Mahárámáyaṇa alias **Vaśishṭha-rámáyaṇa**. A version of the history of Ráma, distinct from that of Válmíki. Usually attributed to the sage Vaśishṭha, but probably of a much later date, and founded on the work of Válmíki. The work is divided into two parts, of which the first treats of the history of Ráma, and the second expounds, in a dialogue between Ráma and Vasishṭha, the principles of the Yoga doctrine as the most approved means of final emancipation. In this respect it appears like an imitation of the Bhagavadgítá. The leaning of the former is more in favour of the Yoga, and that of the latter in favour of the Vedánta; but in neither case is the following faithful.

Beginning. चकमकचममाचनमममभिंसुखीचचद्दिनोर्च पूर्वं ।
विचमविलहदि स्फुरन्नमाचाविकविनविचविचामनात्ततः च ॥ १ ॥
कृतिचविनममचाभीहमुचद्भिवप्रतिमङ्गिमशेमामानविद्यात्मचारं ।
कमपि विचमवाभ्योरहपौमात्मममःसुरमविमचचंमं चाहमभोद्दराचं ॥ २ ॥
मृगधविमापिचनमभोप्रमृचन्दविमं विमचायमप्रतिमचायचपाचटाचं ।
चपेमरं मृचनं मृनिभिमुनीनां ज्योधपूलचमनि मुचमामचाजः ॥ ३ ॥

त्रिभुवनभवनान्तर्ज्ञानोदधेः सद्भक्तानन्दपीयूषोदधेः ।
भुजगपतिरिव करवैभवी मरकतमणि वहा मनोवैभवी ॥ ४ ॥
दृष्टे यत्पादपङ्कजयुगले नाशे या पुस्तके दृश्यते विविधैर्वेदा ।
या शारदा जगदम्बा शरदिन्दुशोभा माता सदा वसतु मे हृदयान्तरे ॥ ५ ॥
ये वेदानि च षट् च वेदाङ्गादि प्रयोजितं चेतसे
येऽप्येवापठने श्रुतिस्मृतिपुरा धर्मं च सर्वोदयः ।
ये कार्यं कथयन्ति ये च परमज्योतिरालोकिता-
स्ते सर्वेऽप्यनघा भवन्तु हृदि मे वेदाधिकारी गुरवः ॥ ६ ॥
यद्भ्रूभ्रुविहिंवु समीक्ष्यवरस्मितैर्हार्दसारामृतदृष्टिं ।
वाणीभूतामितप्रभोरभिवेद्य तं ब्रह्मविद्यादिगुरुं प्रपद्ये ॥ ७ ॥
यद्वाक्याब्धिप्रवाहिनां प्रतिपदं मतं सुधा जीवनी
यद्वाक्यार्थविचारणादपि ततः सर्वोऽपि कारान्तरं ।
यद्वाणीविमलाब्धिपूर्णमनसां शुद्धं जगत् पूजयन्
तस्मै श्रीगुरवे वसिष्ठमुनये नित्यं नमस्कुर्महे ॥ ८ ॥
यस्यार्थप्रथिता जगत्त्रयहिता या वेदमाता परा
यत्कर्मे तपसा बली दुरवगाहनाम्नाम् विश्वपूजितम् ।
तं वेदाम्बुनिधिं तपस्विमुकुटालङ्कारचिन्तामणिं
विश्वामित्रमुनिं प्रणम्य सततं मूर्ध्ना नमाम्यहं ॥ ९ ॥
गुरुत्वा प्रबोध रामः प्रकटितमहिमा येन तस्मै वसिष्ठः
यः सीतां ब्रह्मविद्यामिव मदृशि पुनः लब्धवान् [illegible]दात् ।
यद्वाणी मोक्षमूलं प्रमथति जगदानन्दसन्दोहदात्री
तस्मै वाल्मीकये श्रीगुरुवरगुरवे भूरिभावैर्नताः स्मः ॥ १० ॥
पूर्णानन्दस्वभावब्रह्मविलसन् मायधोपाश्रयः
कारुण्याद्भुदृषिपूर्णजनमनवरतं श्रीरघुवीरं निमग्नं ।
यावित्राणार्थसिद्धं बहिरपि कलयन् शिवभावं वितेने
यः संसारेण शान्तानन्तजलधिमनु रामचन्द्रं प्रपद्ये ॥ ११ ॥
विद्याभिः सह विपुला वितवतो येषां गुरुं भारती
सन्तोषार्थसमाधिभिः स्थिरमतो मद्गुरवो येषां हृदि ।
पादाम्भोरुहलालिता च सततं तीर्थं मम सम्पदः
श्रीमच्छङ्करलालीलाविदितान् श्रीमद्गुरून् संश्रयान् भजे ॥ १२ ॥
श्रीः मंगलेन चरणौ हृदये रामचन्द्रो मम [illegible] नरहतौ च ।
।

येषामलमदविद्यादिलमालभेदान् श्रीमद्गुरून् गुरुतरान् प्रणतोऽस्मि नित्यं ॥ १२ ॥

नाथत्रिविधातलनायकमकुटायमानमायानिवेशमग्रन्थितस्वरूपम् ।

श्रीमद्रामानुजमुनिमनुगम्य धर्मानुपदिशं दैशिकवर्यान् प्रणतोऽस्मि ॥ १४ ॥

विवेकोऽपि यतिः समत्वपरत्वौ यान् नामयन् श्रीवरदा-

चार्यादिभिरनुकम्पित रचना पूर्वे यथेतामवीत् ।

यत्पूज्यौ विदधे मुनिर्मनिमना सर्वोत्तमौ सदा

श्रीमद्रामानुजपूर्वकवरदान् प्रणमितान् भजे ॥ १५ ॥

हरिभिरद्भुतकराः स नु प्रबन्धाः स च ये वाचिसमुदिरेव जगुः ।

तदपि निरपमेऽप सहृदयां सदयमिदीयकमेव मेऽयमहम् ॥ १६ ॥

यमेवविद्याम्बुधिपारगामानपाकरामादिगुरोर्महात्मनां ।

कृपानिधीनां हरितां ममास्तित् सतां पदाम्बुजरजं शरणः ॥ १७ ॥

यत्कृपालेशमात्रेण सौख्येऽस्मिन् भवसागरे ।

श्रीमद्वादरायणाचार्यान् श्रीगुरूंस्तान् सदा भजे ॥ १८ ॥

यामन्दबोधयतिना श्रीमद्वरदयोऽस्तैः ।

वाचितार्थप्रकाशोऽयं यथामति वितन्यते ॥ १९ ॥

प्रशंसन्तु केरं मतिमिरव निन्दन्तु कुधियः

प्रकृतिर्नो यन्नात्र भवति यथारामतपते ।

यमेन वाचेनायमरतपमिदेहिकमहिदे

विकृतं वाच्छामि प्रतिदिनमानन्दजननी ॥ २० ॥

यथामति पुष्पतुष्णाः सारार्थं सतुकेमिव ।

दुरुहश्लोकजालेषु दर्शयिष्ये परिष्कृतं ॥ २१ ॥

विकलेकरवे मुग्धा वायारघनिकुम्भं ।

याचितं रोचयत्वेतत् सुधीभ्यं सरसं यथा ॥ २२ ॥

यत्वस्तुतिदुर्बोधं स्फुटं व्याख्यास्ते पदं ।

किञ्चिद्व्याख्यानपूर्वं तु दुरूहमपि मोक्षते ॥ २३ ॥

सन्मतपूर्वव्याख्यानं यत्नं मे यायिकीर्षतः ।

सन्तः सकृपाः कृपया सकलं [illegible] ॥ २४ ॥

अथ [illegible] [illegible] अवतारामवतरण-

[illegible] तापत्रितयदावानलज्वालाजालाकुले

[illegible] विवेकानां प्रबोधनाय-

[illegible] तत्प्रबोधनाय भगवतः [illegible] [illegible]

ततश्च प्रवर्तमानः परमकारुणिको भगवान् वाल्मीकिः प्रारिप्सितस्य ग्रन्थस्य निर्विघ्न-परिसमाप्तिप्रचयगमनादिसिद्धये तच्छास्त्रप्रतिपाद्यतयाभिमतं सर्वविघ्नमूलोच्छेदकं सच्चिदानन्दाद्वयप्रत्यगात्मपरब्रह्मस्वरूपलक्षणं मङ्गलमाचरन् वक्ष्यमाणस्य विषयप्रयोजने तटस्थ-स्वरूपलक्षणाभ्यां संक्षिप्य दिदर्शयिषुः प्रथमं यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुत्युक्तलक्षणलक्षितसच्चिदानन्दरूपमर्थं तत्पदार्थं नमस्यति यत इति ॥

मू० । यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥

End. यत् सर्वं खल्विदं ब्रह्म तज्जलानि तिच(?)स्फुटं ।
श्रुत्वा सुदीर्य्यंते यान्ति तस्मै ब्रह्मात्मने नमः ॥ २१ ॥

Colophon. इति श्रीमद्रामायणे निर्वाणप्रकरणे उत्तरार्द्धे वाल्मीकीये मोक्षोपाये देव-दूतोक्ते लक्षचतुष्कसंहितायां वासिष्ठे ब्रह्मदर्शने षोडशोत्तरद्विशततमः सर्गः २१६ । सम्पूर्णश्चेदं निर्वाणप्रकरणमुत्तरार्द्धमिति शिवं

टी० । वाक्यपुष्पाञ्जलिः सोऽयं मया भक्त्या समर्पितः ।
श्रियः प्रेरकयोः श्रीमच्छिवयोः श्रीपदाब्जयोः ॥ ॥ ॥

इति श्रीवासिष्ठतात्पर्यप्रकाशे निर्वाणप्रकरणे उत्तरार्द्धे षोडशोत्तरद्विशततमः सर्गः २१६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गङ्गाधरसरस्वतीपादशिष्यश्रीरामचन्द्रसरस्वतीपूज्यपादशि-ष्यश्रीमद्गङ्गाधरेन्द्रसरस्वत्याख्यभिक्षोः शिष्येण आनन्दबोधेन्द्रभिक्षुणा विरचितः श्रीवासिष्ठतात्पर्य-प्रकाशः सम्पूर्णः इति ॥

विषयः । वासिष्ठोत्तरार्द्धव्याख्यानं । वासिष्ठोत्तरार्द्धे तु रामवसिष्ठसंवादेन निर्वाणमोक्ष-निरूपणं ।

No. 2050. ईश्वरगीताभाष्यम् । Substance, country-made paper, 11½ × 3¼ inches. Folia, 105. Lines, 9 on a page. Extent, 3,120 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

I'śvaragítá-bháshya. A commentary on an episode of the Kúrma-puráṇa. By Vijnána Bhikshu. In this episode Súta expounds to the sages assembled in the Naimisha forest the principles of the Vedánta doctrine. It is obviously an imitation of the Bhagavadgítá, but it differs from its archetype in dwelling exclusively on Vedántism, instead of mixing it with the Sáñkhya and the Yoga doctrines. The text has already been noticed, see vol. I, p. 257.

Beginning. यो नामरूपे विवृणुते विरचय्य विश्वमेतत् प्रविश्य सकलोऽभवदेकरूपः माया ।
यस्माच्च भिद्यति कर्मविभ्रमतो न सोऽस्त्वपैतु यतो महदेवदेवोऽसौ ।
सर्ववेदान्तसारार्थं व्याख्याय यतिसत्कृतं ।
व्यासगीतेश्वरगीतायामे विज्ञानभिक्षुणा ।
एतेन भगवद्गीताव्याख्यापि व्याख्याति ।
ब्रह्मादिभेदभावच्च गीतयोरेकतात्मनः ॥

गीतारायणेन कूर्मरूपिणा ब्रह्मादिभ्योऽभिहितपुराणवंशानां ज्ञानं कर्म च कूर्मपुराणे उपनिबद्धं तदेतत् सकलकल्याणपरमसाधनं ब्रह्मादयो ब्रह्मवादं विशदतः श्रोतुकामाः पुनः स्वतं चतुर्मुखात् पुराणकर्त्ता व्यासदेवः । तत्र तत्पूर्वमिति षड्भूतवादाय भवतीति ।

End. आनुषंगिकमोक्षाधिकारोऽपि मानुषेषु विशेषतः इदं यतं कर्तव्यं मुमुक्षु पाठे त्रिवारो नास्तीति विशेषः ।

Colophon. इति कूर्मपुराणे ईश्वरगीतासूपनिषत्सु विज्ञानभिक्षुकृतभाष्ये एकादशोऽध्यायः । ईश्वरगीताभाष्यं समाप्तं ॥

विषयः । वेदान्तव्याख्यानरूपस्य कूर्मपुराणान्तर्गतेश्वरगीताया व्याख्यानं ॥

No. 2051. प्रश्नोपनिषदालोकः । Substance, country-made paper, 11¼ × 3¼ inches. Folia, 17. Lines, 10 on a page. Extent, 544 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Praśnopanishadáloka. A gloss on the Praśnopanishad, one of the Upanishads of the Atharva Veda. By Vijnána Bhikshu. The text along with the commentary of Sańkara Áchárya and the gloss of Ánandagiri has been printed twice. and the text has been translated into English by Rájá Rámamohan Ráya, Dr. Roer, Bábu Rájnarain Bose and others.

Beginning. अथ प्रश्नोपनिषद्व्याख्यायते । ॐ सुकेशा च भारद्वाज इत्यादि । प्रश्नोत्तररूपं मध्यविद्योपक्रमार्थं । सुकेशा नामतः भरद्वाजस्यापत्यं भारद्वाजः तथा शिबेरपत्यं शैब्यः सत्यकामो नामतः तथा सौर्यायणी नामतः गर्गस्यापत्यं गार्ग्यः तथा कौसल्यो नामतः अश्वलस्यापत्यं आश्वलायनः तथा भार्गवः वैदर्भिर्नामतः तथा कबन्धी नामतः कत्यस्यापत्यं कात्यायनः ते च प्रसिद्धा एते षडेते सुमर्धा ब्रह्मपरा वेदतत्परा ब्रह्मनिष्ठाः कार्यब्रह्मोपासकाः परं ब्रह्मान्वेषमाणाः ब्रह्मसदृशा बभूवुरित्यर्थः ।

End. प्रकृतिविद्यास्मदादयस्तु न् न शक्नुवन्ति तत इति हिरण्यगर्भं प्रमाणं ।
षष्ठः प्रश्नः ॥

Colophon. इति भिक्षात्मविभूषितं वेदान्तवाक्ये प्रश्नोपनिषद्दीपिकः समाप्तः ॥

विषयः । प्रश्नोपनिषद्व्याख्यानं ।

No. 2052. शास्त्रदीपिका । Substance, country-made paper, 10 × 4½ inches. Folia, 388. Lines, 9 on a page. Extent, 9,871 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'ástra-dípiká. A commentary on the Mímáńsá aphorisms of Jaimini. By Párthasárathi Miśra. The codex is very corrupt and defective.

Beginning. पूर्वपादे प्रथमसूत्रोऽनर्थक इति विरोधापत्तेः । तदुक्तं ।

End. तदेवं सुगमं यदपि च विषमं किञ्चित्
तथा ग्रन्थजातं विविधमिह माध्यं यदुपचितं ।
वाक्यभ्रान्त्याभ्युपगतविधिरिति यत्नेन (?) नु
प्रयोगे यत्नाधाः (?) तत स्वपरहितमना प्रकुरुते ॥

Colophon. इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशाध्याय-
स्य: पादः समाप्तः ॥

विषयः । मीमांसासूत्रव्याख्यानं । पुस्तकमिदं प्रथमे मध्ये शेषे च खण्डितं ॥

No. 2053. स्कन्दपुराणीय-अम्बिकाखण्डः । Substance, foolscap paper, 13 × 8½ inches. Folia, 232. Lines, 16—17 on a page. Extent, 11,740 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Ambiká-khaṇḍa of the **Skanda Puráṇa**. A part of the first or Máheśvara khaṇḍa of the seven divisions of the Skanda Puráṇa. The codex assigns it 216 chapters, and their contents are as follow :—1, Birth of Kártikeya ; 2, Abstract of the work ; 3, Origin of the Naimisha forest ; 4, Prájápatyábhisheka ; 5, Birth of Rudra ; 6, Lopping off of the heads of Brahmá ; 7, Restoration of the heads ; 8, Devas' visit to Rudra ; 9, Birth of Suvarṇáksha ; 10, Curse on Daksha ; 11, Penance of Umá ; 12, Alligators (?) ; 13, Marriage of Umá ; 14, Praise of marriage with S'iva ; 15, Benediction on Vaśishtha ; 16, Birth of S'akti, son of Vaśishṭha ; 17,

Curse on Kalmásapáda; 18, Rákshasa sacrifice; 19, Dispute between Vasishṭha and Viśvámitra; 20—24, Story of Nandi; 25, Marriage of S'iva; 26, Umá's request; 27, Gift of cattle, gold &c. to S'iva; 28, Worship of S'iva; 29, Kuvera's benediction on Paṇchachúḍa; 30, Praise of Benares; 31, Do. of Dadhicha; 32, Destruction of Daksha's sacrifice; 33, Birth of Vṛisha; 34, Benediction on Upamanyu; 35, Do. on Sukeśa; 36—48, Description of various hells; 49, Philosophy expounded by Yama *(Yamagítá)*; 50, Mutation of creation; 51, Praise of Sukeśa; 52, means of escaping from hell; 53, Penance of Durgá; 54—56, Brahmá's benedictiom on Durgá; 57, Story of the seven fowlers; 58, Kingdom of Brahmadatta; 59—68, Story of Kauśika; 69, Hara and Párvati's tour to Mandára; 70—71, Story of Narasiṅha; 72, Birth of Skanda; 73, Do. of Andhaka; 75—76, Story of Ḥiraṇyáksha; 77, Sacrifice of the Asuras; 78 to 106, Wars of the Devas and Asuras; 107—108, Story of Varáha; 109, Departure of Mahádeva to Sumeru; 110, Fruits of gifts; 111, Penances; 112, Duties of women; 113—115, The churning of nectar; 116—121, Legend of the Dwarf incarnation; 122, Destruction of Sriṅhikeya; 123, Story of Hariśchandra; 124, Story of Paraśuráma; 125, Worship of Vasudhá; 126—128, Story of the descent of the Ganges; 129—148, Wars of Devas and Asuras; 149—151, Story of Párvatí's accepting an Aśoka tree for a son; 152, S'iva expounds Dharma; 153, Story of S'iva's throat becoming blue; 154, On the propriety of rubbing ashes and dust on the body; 155, On S iva's dwelling on burning grounds; 156, An offering of aromatic waters to S iva; 157—159, Sacred edifices; 160, Feasts of Bhairava; 161, Birth of Vináyaka; 162, Birth of Skanda; 163, Devas repair to behold Skanda; 164, Mátṛís deputed by Indra to assassinate Skanda; 165, Battle between Skanda and Indra; 166—169, Skanda appointed generalissimo of the army of the Devas; 170—173, Destruction of Tárakásura; 174, Indra's address to Skanda; 175, Destruction of Mahisásura; 176, Thrones of Maheśvara; 177, Hymns in praise of do.; 178, Story of the messengers of Yama and Saṅku; 179, Account of Kálanjara; 180—181, Story of reviving Yama; 182, Temples for gods; 183, Story of Bhadreśvara; 184, Fruit of reciting the name of Mahádeva in a Deodar forest; 185, Temples of gods; 186, Benediction on Maya; 187—195, Legend of Tripura; 196—197, Description and revival of Krauncha; 198—200, The wars of Pralháda; 201—206, Story of Himavat and the clipping of his wings; 207—216, Story of Prahláda's wars with Náráyaṇa and its consequences.

Beginning. वक्त्राम्भोजः सकलशशधरनिभदन्तः सर्वाङ्गश्री गणपतिर्भुजगोपवीती ।
विघ्नानि नाशयतु शैलसुतो ममाशो देवी च सा कमलिनी वरदा च लक्ष्मीः॥
नमः परमदेवाय त्रैलोक्याधिष्ठितात्मने ।
सर्वतो योगरूपाय संसाराभावहेतवे ॥
स्थितिसर्गोपसंहारान् कर्त्रे सर्वं पुरारिणे ।
चतुर्विंशाय पुराणाय महादेवाय धीमते ॥
प्रजापतेर्मध्यमाय महाकालिन्दिनन्दने ।
प्रयागे परमे पुण्ये ब्रह्मणो लोकसंमिते ॥
मुनयः संशितात्मानस्तपसा क्षीणकल्मषाः ।
तीर्थसंस्नानकार्थाय पौर्णमास्यां कृताह्निकाः ॥
पौराणिकमथायान्तं सूतं सत्यपरायणं ।
स्नानमस्मिन् महातीर्थे प्रकामार्थमुपागतं ॥
दृष्ट्वा ते सूतमायान्तं ऋषयो हृष्टमानसाः ।
पाद्यार्घ्याचमनार्थं तदोच्च समकल्पयन् ॥
स प्रणम्य ततः सर्वान् सूतस्तान् मुनिपुङ्गवान् ।
प्रदत्तमासनं भेजे सर्वधर्मसमन्वितः ॥
समासीनमथ प्रेक्ष्य मुनयस्ते समाहिताः ।
प्रश्रयेण पुराणज्ञा नैमिषारण्यवासिनः ॥
कथितं भारताख्यानं पुराणञ्च पुरा त्वया ।
तेन नः प्रतिभाषितं साक्षात् सत्यवतीसुतः ॥
धर्मार्थकामपरार्थज्ञः सत्यधर्मपरायणः ।
द्विजपूजारतो नित्यं येन दृष्टा महर्षि ॥
भारताख्यानसदृशं पुराणाद् यद्विशिष्यते ।
तथा इच्छामि वै तत्र कार्त्तिकेयस्य धीमतः ॥

End. ये मत्तीनागुणाः सर्वे वसवश्च महासुराः ।
गुणैश्चन्द्रप्रतिमासमो——————बभूव भूरितरां सुतुमंसा ॥

Colophon. इति स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे प्रह्लाद-
नारायणीये दशाधिकशततमं समाप्तं । समाप्तोऽयमम्बिकाखण्डाख्यो ग्रन्थः ।

विषयः । अथ १ मे अध्याये, कार्त्तिकेयोद्भवप्रश्नः । २ ये, समुद्रमथनिका । ३ ये, नैमिषारण्य-
निवर्णनं । ४ थें, मनसः प्राजापत्याभिषेकः । ५ मे, दक्षीयनिः । ६ ष्ठे, मनसः शिरश्छेदनकथनं ।
७ मे, कपालसंस्थापनं । ८ मे, देवैः ब्रह्मदर्शनविवरणं । ९ मे, तपसंयोगनिवर्णनं । १० मे, दृष-

ध्यायवर्णनं । ११ अ०, उमातपश्चर्यावर्णनं । १२ अ०, पार्वत्याश्रमोपवर्णनं । १३ अ०, उमापरिणयनं । १४ अ० ब्रह्मविवाहकथनं । १५ अ०, वसिष्ठवरप्रदानं । १६ अ०, ब्रह्मिणामकपालिकपुष्पोत्पत्तिः । १७ अ०, ब्रह्मावधावधारणविवरणं । १८अ०, राजसचयविवरणं । १९ अ०, वसिष्ठे शिवाभिषेक वैदिकवर्णनं । २०अ०, नन्दिनः प्रवेशः । २१ अ०, नन्दिना महादेवस्तुतिः । २२अ०, नन्दीश्वरदेवकथनं । २३अ०, नन्दीश्वराभिषेकार्थं महादेवेन इन्द्रादिदेवताह्वानं । २४अ०, नन्दीश्वराभिषेककृतिकथनं । २५ अ०, नन्दीश्वरविवाहकथनं । २६ अ०, माता मेनया कथिता पतिनिन्दा श्रुत्वा दुःखिता पार्वती शिवसमीपमागत्य धर्ममाचिख्यास इत्यादिविवरणं । २७अ०, शिवाय गौरी-विरहादिदानकथनं । २८ अ०, शिवपूजाविधिः । २९ अ०. कुबेरस्य पूजावरप्रदानं । ३० अ०, पार्वतीलीलावर्णनं । ३१अ०, इन्द्रीलीलावर्णनं । ३२ अ०, इन्द्राग्निमाहात्म्यवर्णनं । ३३ अ०, इन्द्रोत्पत्तिवर्णनं । ३४अ०, चण्डस्य वरप्रदानं । ३५अ०, कुबेरवरप्रदानं । ३६अ०, शिवप्रश्नः । ३७अ०, नरकदुःखानुभवीर्णनं, नरकप्राप्तिवर्णनञ्च । ३८अ०, महाकालीनामनरकवर्णनं । ३९अ०, कालसूत्रकनरकवर्णनं । ४०, कुम्भीपाकनरकवर्णनं । ४१, असिपत्रवनाख्यनरकवर्णनं । ४२, वैतरणीनरकवर्णनं । ४३, पूयोदनरकवर्णनं । ४४, पद्माख्यनरकवर्णनं । ४५, महापद्माख्यनरकवर्णनं, रौरवनरकवर्णनञ्च । ४६, महारौरवनरकवर्णनं । ४७, तमोनामनरकवर्णनं । ४८, महातमोनामनरकवर्णनं । ४९, यमलीलाकथनं । ५०, संसारपरिवर्तनकथनं । ५१, कुबेरमाहात्म्यं । ५२, नरकाभावोपायवर्णनं । ५३, कुबेरतपोवर्णनं । ५४, प्रद्युम्नपापहरणाख्यानं । ५५, महापापनाशनाख्यानं । ५६, कुबेरवरप्रदानं । ५७, यज्ञाश्वमेधाख्यानं । ५८, प्रद्युम्नस्य राज्ञो इत्याख्यानं । ५९, कौशिकीमाहात्म्यवर्णनं । ६०, कौशिक्या विन्ध्यगिरिनिवासाख्यानं । ६१, दैत्योत्पत्तिवर्णनं । ६२, शुम्भदैत्यवधवर्णनं । ६३, चतुर्विंशवर्णनं । ६४, चतुरोत्सववर्णनं । ६५, ६६, देवा कौशिक्या सह चतुराणां युद्धाख्यानं । ६७, कौशिक्यभिषेचनं । ६८, कौशिकीदेवस्थाने वा देवता देवेषु नगरेषु च देवा भवेयम् इत्याद्याख्यानं । ६९, पार्वत्या सह चरणसम्बन्धाख्यानं । ७०, ७१, नारसिंहेन हिरण्यकशिपुवधाख्यानं । ७२, नृसिंहोत्पत्तिवर्णनं । ७३, नृसिंहोत्पत्तिविवरणं । ७४, नृसिंहवरप्रदानं । ७५, हिरण्याक्षस्य मधुरप्रवेशाख्यानं । ७६, हिरण्याक्षस्य वधप्रवेशाख्यानं । ७७, चतुर्युगवर्णनं । ७८—१०६, चक्रतीर्थमाहात्म्यादि चतुर्मासमाहात्म्यवर्णनं देवासुरयुद्धवर्णनं । १०७, महाबीजवर्णनं । १०८, महाकालपापहराख्यानं । १०९, महादेवस्य कुबेराख्यानाख्यानं । ११०, दानफलविवरणं । १११ एकादश्यादिव्रतफलकथनं । ११२, तीर्थावलीविवरणं । ११३, नवनागवर्णनं । ११४, भवानन्दी नीलकण्ठोपाख्यानं । ११५, विष्णुना ब्रह्मणोऽग्रतो चतुरो वर देयानां युद्धं । ११६, ११७, भानुमत्प्रादुर्भावः । ११८, ध्रुवपादवर्णनादः । ११९-१२०-१२१, पाशुपतानुष्ठानी श्रीशैलपादवर्णनं । १२२, वैष्णवेशवर्णनं । १२३, परिक्रमनिर्देशः । १२४, महादेवानन्दपुरादवधिमहिमावर्णनं । १२५, मधुरातिमहिमावर्णनं । १२६, १२७, १२८, महापातकहराख्यानं । १२९—१३८ चतुर्विंशतितीर्थमाहात्म्यादि चतुर्विंशतिचक्रमाहात्म्यवर्णनं सप्तदशाङ्गवरदानाख्यानं । १३९,१४०,

१५१, पार्वत्या पृथ्वीनाथाशोकलयोः परिणयवर्णनं। १५२, महर्षिणो यज्ञपत्निकथनं। १५३, महादेवकस्य विपाशीलनकथनं। १५४, गजरक्षः कथं निवेशनं इति पार्वतीप्रश्ने निवेदनं। १५५, अमृतप्रभावाय कथं ग्रामानयाचितं इति पार्वतीप्रश्ने निवेदनं। १५६. जलयुजलाहिता निवक्षापनपत्रदर्शनं। १५७,१५८, १५९, पुष्पापननफलं। १६०, भैरवोत्सवकथनं। १६१, विनायकोत्पत्तिः। १६२, स्कन्दोत्पत्तिः। १६३, स्कन्ददर्शनार्थं देवादीनामागमनवर्णनं। १६४, स्कन्दविनाशार्थं इन्द्रेण मातृगणप्रेरणं। १६५, स्कन्देन सह इन्द्रस्य युद्धवर्णनं। १६६.१६७, स्कन्दस्य देवसेनापतित्वविवरणं। १६८, स्कन्दाभिषेकवर्णनं। १६९, स्कन्दाभिषेकस्तवः। १७०, १७१, १७२, १७३, तारकासुरवधविवरणं। १७४, स्कन्दं प्रति इन्द्रवाक्यं। १७५, महिषासुरवधविवरणं। १७६, महेश्वरस्तोत्रं। १७७, महेश्वरस्तुतिः। १७८, जीवात्मयुक्तं येनमानेन मानवानां यमदूतानां मधुकवर्ण प्रत्याख्यानं। १७९, कालग्रहायतनवर्णनं। १८०, १८१, वनपञ्चीकरणानां। १८२, देवायतनोद्देशः। १८३, अद्रेश्वराख्यानं। १८४, देवदारुवने सह देवानामागमनवर्णनं। १८५, आयतनवर्णनं। १८६, मधवरदानं। १८७, त्रिपुरवर्णनं। १८८,—१९४, पञ्चभौतिकमताध्यायात् पञ्चमतत्त्विकमताध्यायपर्यन्तं त्रिपुरवधवर्णनं। १९६, क्रौञ्चवधवर्णनं। १९७, मौञ्जबन्धीवर्णनं। १९८, १९९, प्रह्लादयुद्धं। २००, प्रह्लादविजयः। २०१, त्रिनयन-सभावर्णनं। २०२, त्रिपुरारिकं। २०३, २०४, त्रिपुरवधवर्णनं। २०५, मनोत्पत्तिः। २०६, पञ्चवेदनारायणवर्णनं। २०७, २०८, नारायणेन सह प्रह्लादयुद्धोद्योगः। २०९, नृसिंहावतारवर्णनं। २१०, नारायणेन सह हिरण्यवधवर्णनं। २११, प्रह्लादाभिषेकः। २१२, परमदेवतावर्णनं। २१३, दानवैः सह देवानां युद्धवर्णनं। २१४, प्रह्लादाभिषेकवर्णनं। २१५, चतुर्दशवाक्योत्पत्तिविवरणं। २१६, प्रह्लादनारायणयुद्धे इन्द्रागमनवर्णनं॥

No. 2054. यतीन्द्रमतदीपिका। Substance, country-made paper, 13 × 5½ inches. Folia, 25. Lines, 11 on a page. Extent, 937 ślokas. Character, Nágara. Date, Sm. 1894, Sk. 1759. Place of deposit, Calcutta, Governmen of India; also another copy at Berhampur, Bábu Rámadása Sena. Appearance, old. Prose. Incorrect.

Yatindramata-dípiká. A summary of the dualistic form of the Vedánta doctrine. By S'ríniváśadása, son of Govinda Áchárya. The work is divided into 10 chapters, and treats of (1) Perception; (2) Inference; (3) Testimony; (4) Nature; (5) Time; (6) Eternal attributes; (7) Intellect; (8) Created beings; (9) God; and (10) Immateriality.

Beginning. श्रीवेङ्कटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ।

कृष्णेन साकं यतिराजमीडे स्वप्ने च दृष्टान् मम देशिकेन्द्रान् ॥ १ ॥

यतीश्वरं प्रणम्याहं वेदान्ताचार्यमद्गुरुं ।

करोमि बालबोधार्थं यतीन्द्रमतदीपिकां ॥ २ ॥

श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैतं तत्त्वं अखिलप्रपञ्चस्य प्रधानः स एव उपायः । अप्राकृतदेहविशिष्टः स एव प्राप्य इति वेदान्तवाक्यैः प्रतिपादयतां व्यास-बोधायन-गुहदेव-भारुचि-ब्रह्मनन्दि-द्रविडाचार्य-श्रीपराङ्कुशनाथ-यामुन-यतिवरप्रभृतीनां मतानुसारेण बाल-बोधार्थं वेदान्तानुसारिणी यतिपतिमतदीपिकाख्या शारीरकपरिभाषा सा संक्षेपतस्त-मालया यथामति संग्रहेण प्रकाश्यते ।

End. वस्तुतस्तु वेदान्तानां चिदचिद्विशिष्टाद्वैतमेकमेव मतमिति तात्पर्यं यत एव चिदचिद्विशिष्टं ब्रह्मैकमेवेति मत्वा भगवान् बादरायणः व्याजे ब्रह्मजिज्ञासेत्युपक्रम्य तमेव ब्रह्मं निरूपितवान् अतः चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विष्णुः परवासुदेवो नारायण एवैकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धं ॥

इति विविधविचित्रं मानमेयप्रकाशं यतिवरवरदार्यैः श्रीमदाद्याय सारम् ।

यतिपतिमतदीपं वेदवेदान्तसारं स भवति मतिमान् यः पञ्चशाखैकवाच्यः ॥

Colophon. इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीमद्वेङ्कटगिरि-नाथपदकमलसेवापरायणश्रीनिवास इत्याचार्यालिखितो वत्सान्वयजुषा श्रीनिवासदासेन विर-चितायां यतीन्द्रमतदीपिकायामष्टपरिच्छेदो नाम दशमोऽवतारः ॥

विषयः । श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैतं तत्त्वं इति प्रतिपादयतां व्यास-बोधाय-न-गुहदेव-भारुचि-ब्रह्मनन्दि-द्रविडाचार्य-श्रीपराङ्कुशनाथ-यामुन-यतिवरप्रभृतीनां मता-नुसारेण बालबोधार्थं संक्षेपतो दशभिः परिच्छेदैर्वेदान्तमतनामस्वरूपकथनं । तत्र १—मे परि-च्छेदे, प्रत्यक्षनिरूपणं । २-ये, अनुमाननिरूपणं । ३-ये, शब्दनिरूपणं । ४-थे प्रकृतिनिरूपणं । ५ मे, कालनिरूपणं । ६ष्ठे नित्यविभूतिनिरूपणं । ७-मे, बुद्धिनिरूपणं । ८-मे, जीवनिरूपणं । ९-मे-ईश्वरनिरूपणं । १०-मे, अद्रव्यनिरूपणं ॥

No. 2055. दीपप्रकाशः । Substance, country-made paper, 9 × 4¼ inches. Folia, 42. Lines, 8—10 on a page. Extent, 1,036 ślokas. Character, Nágara. Date, Sm., 1785. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dípa-prákáśa. On dedication of lighted lamps to the goddess Rájarájeśvarí according to Tántric rules. By Premanidhi Sarmá.

Beginning. यत्पादपद्मयोर्वरजःकणं सुन्दरतरी
तरीभूतोऽपारतिमिरसमुद्रस्य संसारमध्ये ।
करी सर्वांगस्य पङ्कजनन्दीभूतविपक्षा-
दर्पोद्धतप्रभावाणिव जयति दीपप्रकाशपतिः ॥ १ ॥

End. श्रीमत्सोमनाथी यती गुरुवती नाना विधेयापत्ति-
र्मानग्रन्थमितीति पञ्चकुसुमः कुर्वाणको मन्मथः ।
दूरावधूतनानीयंस्त्रायगतदं मुखमानपयम्-
हस्तान्धनमेऽसूत्ता विवृता दीपप्रकाशः कृतः ॥

Colophon. इति श्रीप्रेमनिधिशर्म्मविरचितो दीपप्रकाशः सम्पूर्णतामगमत् ॥
विषयः । तन्त्रोक्तविधानेन श्रीराधाराजेश्वरीदेवीपदानविधिकथनं ॥

No. 2056. शब्दप्रकाशः वा दीपप्रकाशटिप्पनम् । Substance, country-made paper, 9 × 3¾ inches. Folia, 120. Lines, 10 on a page. Extent, 3,210 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'abdaprakáśa alias **Dípaprakáśa-ṭippana.** A commentary on the work noticed under the last preceding No. by the author himself.

Beginning. प्रणम्येष्टदेवं विधाय दीपोत्सवं राजराजेश्वराख्यं स्मरेत् ।
शब्दीपप्रकाशस्थितविशदप्रकाशं तनोमि च पाठानुरोधात् ॥ १ ॥

अथ नानातन्त्रपञ्चाशेषजनताप्रचारादिकरणार्थमपारचारेण श्रीराजराजेश्वरीपादपद्ममकरन्दसे-
वीभूतोपकारादिकारा श्रीमहेश्वरोपासनाप्रसादमाकाङ्क्षमाणो दीपप्रकाशनामानं शब्दीप-
प्रकाशनामानं विवरणीयमपरमार्गं विनिर्दिश्य तन्त्रोक्तविवरणोद्धरणमुद्राशास्त्रं सर्वं
विचार्य पुण्यसमाप्तिप्रतिबन्धकप्रत्यूहव्यूहनिर्भञ्जनार्थं संक्षेपतः दीपप्रियतया तद्रचनया प्रारब्ध-
कार्यकरणं प्रसादलक्षणमभिप्रेत्य दीपप्रकाशनिर्माणे दीपानुकूलत्वेन प्रारब्धोचितमङ्गलं तथा
च तथा प्रारब्धस्वकारणसमर्थं तत्त्वं कृत्वा शिष्यशिक्षार्थे लिखति । यथार्थमादि ।

End. यदि वि उपरतो द्विवि गुरुत्वे विधिवे ना + तैत्तिरीयविवरणं तदेवात्रा-
भिप्रेत. श्रीमहेश्वरदेवदीपपाशप्रभृतिभिर्विभवमाहात्म्यात्मस्वरूपं कार्यं विवरणेन
पञ्चाशत्ये । तथा च अवच्छिन्नं विशं हविषां विशं विचारणान्त विश पञ्चकर्त्तव्यं दीप-

प्रकाशः दीपस्य पूर्णोपदिष्टस्य प्रकाशः स्वरूपं दीपप्रकाशनाम्ना यस्य ग्रन्थोऽनुष्ठितो बुद्धिपूर्वकं न सम्यगाख्यात इत्यर्थः ।

इत्थं शब्दप्रकाशचरणकमलयो राधिकामाधवस्य
श्रीवालीलाविहारानुभवजनितविशेषप्रकाशके भावनायै ।
कृष्णाकृष्णौ प्रसन्नौ परपरमविरागिणं भावनायां ये
मूलं मूलस्य यस्मादपरमपि परं नास्ति संक्षेपमात्रं ॥ १ ॥
यस्याभिः सकलः प्रयोग उदितो रत्नाकरं सन्ततो
मूलं भक्तिमतिप्रीतिभिरिति मत्तोऽपि तत्त्वं दर्शितं .
तस्यं संक्षेपविमलोपपत्तके दीपप्रकाशे किल
कृता शब्दमतिः प्रकाशितनराणां छान्दसं निर्मिता ॥ २ ॥
माध्वाचार्यं कृत्वा यथायानुष्ठितादितो यन्नात् ।
दीपप्रकाशकर्णुंगेयायाय्यं विमध्यस्थि ॥ ३ ॥
दीपप्रकाशे हि मतोऽस्ति यस्य शब्दप्रकाशेऽपि मतोऽस्तु तस्य ।
शब्दप्रकाशेन विना न मुक्तो दीपप्रकाशे भविता प्रवेशः ॥ ४ ॥
यस्योद्योतनती सती गुणवती माता पितामामपनि-
र्गत प्रेमविधीनि यस्य कुलभूः कुम्भायनो जन्मभूः ।
स्वप्नः कृष्णवीर्णामानपदं भूतमस्त्वैवसभू-
इत्यानन्दयतोऽमुना विवृता शब्दप्रकाशः कृतः ॥ ५ ॥

Colophon. इति श्रीमत्प्रेमनिधिविरचितनिर्णीतदीपप्रकाशटिप्पणभूतशब्दप्रकाशदर्पणः समाप्तः ॥

विषयः । सटीकदीपप्रकाशविवरणशब्दार्थानां प्रकटीकरणं ।

No. 2057. योगशास्त्रं । Substance, country-made paper, 11¾ × 4¼ inches. Folia, 5. Lines, 9 on a page. Extent, 126 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India; also another copy at Murshidábad, Jápharaganj, Gopáladása Mahanta. Appearance, old. Prose. Incorrect.

Yoga-śástra. A brief exposition of the Yoga aphorisms of Patañjali. The codex is defective, and the name of the author of the work cannot be made out.

Beginning. (आद्यपत्रं नास्ति)। चित्तवृत्तिनिरोधोपायाभ्यासवैराग्याभ्यां (?) संयम-प्रसादाद्वाह्यविरक्ति-भाविन्दसंप्रज्ञातसमाधिसिद्धिरिति ।

End. कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ।

Colophon. इति योगसूत्रे कैवल्यपादश्चतुर्थः ॥ समाप्तः ।

विषयः । पातञ्जलयोगसूत्रतात्पर्यविषयीभूतार्थस्य संक्षेपेण कथनं ॥

No. 2058. योगमणिप्रभा वा पातञ्जलयोगसूत्रवृत्तिः । Substance, country-made paper, 11¾ × 4½ inches. Folia, 60. Lines, 9 on a page. Extent, 1,134 ślokas. Character, Nagara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Yogamaṇi-prabhá. A commentary on the Yoga aphorisms of Patanjali. By Rámánanda Sarasvatí, pupil of Govidánanda. It follows the Pátanjala-bháshya.

Beginning. वन्दे कंसारिपदाम्बुजं पुराणपुरुषं हरिं ।
प्रकृत्या धीतया युक्तं योगेशं योगदायिनं ॥
पतञ्जलिं सूत्रकृतं प्रणम्य व्यासं मुनिं भाष्यकृतञ्च भक्त्या ।
भाष्यानुगां योगमणिप्रभाख्यां वृत्तिं विधास्यामि यथा मतिश्च ॥
इह खलु भगवान् पतञ्जलिः प्रेक्षावत्प्रवृत्त्यङ्गशास्त्रप्रतिपाद्यं दर्शयति ॥
अथ योगानुशासनम् ॥

End. यत्नादेवं प्रमादविरतः स वाचयेद् गुरोरिदं ।
सूत्रं व्याख्यातं योगे सन्मतिं समाश्रितं ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्पूज्यपादशिष्य-श्रीरामानन्दसरस्वतीकृतौ पातञ्जलसूत्रवृत्तौ योगमणिप्रभाख्यायां कैवल्यपादश्चतुर्थः समाप्तः ॥

विषयः । पातञ्जलयोगसूत्रस्य भाष्यानुगतव्याख्यानं ॥

No. 2059. पथ्यापथ्यविबोधकः । Substance, country-made paper, 9 × 4¼ inches. Folia, 118. Lines, 8—10 on a page. Extent, 3,729 ślokas. Character, Nágara. Date, Sm. 1767. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

